DUE DATE SLIP

GOVT. COLLEGE, LIBRARY

KOTA (Raj.)

Students can retain library books only for two weeks at the most.

BORROWER'S No.	DUE DTATE	SIGNATURE

THE KASHMIR SERIES

OF

TEXTS AND STUDIES.

Printed by Ramchandra Yesu Shedge, at the 'Nirnaya-sagar' Press,
23, Kolbhat Lane, Bombay.

Published by Mahamahopadhyaya Pandit
Mukund Ram Shastri for the Research Department,
Jammu and Kashmir State, SRINAGAR.



काश्मीर-संस्कृतग्रन्थावलिः ।


ग्रन्थाङ्कः १९

जन्ममरणविचारः ।

श्रीमन्महामाहेश्वराचार्यवर्य-श्रीभट्टवामदेवविरचितः ।

श्रीभारतधर्ममार्तण्ड-कश्मीरमहाराज-श्रीप्रतापसिंहवरप्रतिष्ठापिते
प्रत्नविद्याप्रकाश-(रिसर्च)कार्यालये
तदध्यक्ष-महामहोपाध्याय-पण्डित-मुकुन्दराम-शास्त्रिणा
तद्दिष्टकार्यालयस्थेतरपण्डितसहायेन
संगृह्य, संशोधन-पर्यायाङ्कन-विवरणादिसंस्करणोत्तरं
पाश्चात्यविद्वत्परिषत्संमताधुनिकसुगमशुद्धरीत्युपन्यासादिसंस्कारैः परिष्कृत्य

मुम्बय्यां
निर्णयसागराख्यमुद्रणालये मुद्रापयित्वा प्राकाश्यमुपनीतः ।



संवत् १९७५   ख्रैस्ताब्दः १९१८

काश्मीर-श्रीनगर ।

श्रीमच्छ्रीकण्ठनाथप्रभृतिगुरुवरादिष्टसन्नीतिमार्गो
लब्ध्वा यत्रैव सम्यक्पटिमनि घटनामीश्वराद्वैतवादः ।
कश्मीरेभ्यः प्रसृत्य प्रकटपरिमलो रञ्जयन्सर्वदेश्यान्-
देशेऽप्यासिन्नदृष्टो घुसृणविसरवत्स्तान्मुदे सज्जनानाम् ॥१॥

तरत तरसा संसाराब्धिं विधत्त परे पदे
पदमविचलं नित्यालोकप्रमोदसुनिर्भरे ।
विमृशत शिवादिष्टाद्वैतावबोधसुधारसं
प्रसभविलसत्सद्युक्त्यान्तःसमुल्लसदायिनम् ॥ २ ॥

PREFATORY.

The present booklet entitled the Janma Maraṇa Vichāra, which appears in public for the first time, is based on a single MS., which, along with many others[1], was obtained by me in Agra in 1912 A. D. It is on very old Kashmiri paper, written by one Krishṇa Swāmi of Kashmir, in Shāradā characters, about the year 4603 of the Laukika era (1527 A. D.).

The Janma Maraṇa Vichāra is a treatise on what is known as the Advaita Shaiva Philosophy of Kashmir, composed by one Bhaṭṭa Vāmadeva who, as he himself says at the end of this book, was a disciple of Yogīshvarāchārya: the latter being a great preceptor and probably the same personage as Yogarāja, the famous commentator on Abhinava Gupta's Paramārthasāra, and a pupil of both Abhinava Gupta and Kshemarāja. From this relation of Vāmadeva with Yogarāja, it can be inferred that the former lived about the end of the eleventh century A. D., or in other words, some two generations after Abhinava Gupta. This inference is also supported by a legend which proclaims Vāmadeva as a contemporary of Mahārāja Anantadeva, who ruled over Kashmir from 1038 to 1091 A. D.[2] Vāmadeva does not seem to have been an author of great eminence, as besides this little book there is not a single work of his which has been found or whose name has even been heard of.

The book in hand is a handy compendium of the various truths established in almost all the works bearing on the Advaita Shaiva Philosophy of Kashmir. The author begins with showing how Parama Shiva (the highest Reality), Who is beyond all Time and

1. For a brief history of these MSS., see my Preface to the Tantrasāra, forming Vol. XVII of this Series.

2. See History of Kashmir (in Persian), by Hassan Shah.

Space, remains unaffected in His five-fold power and glory—namely, of Chit, Ānand, Ichchhā, Jñāna and Kriyā[1]—despite the fact that it is He Who constitutes this Universe.

As pointed out elsewhere, the great preceptors of the Kashmir Shaiva School of Philosophy maintain that the individual self cannot realise his identity with the Supreme Self because of the three kinds of Mala (impurity), which 'are brought into action by Nāda, the female element constituting a primeval power (Shakti) of Shiva, from which rises speech.' The three kinds of Mala, referred to above, are technically called as Āṇava (when the self is subjected to limitations), Māyīya (that effected by Māyā), and Kārma (that resulting from actions, good or ill). The ignorance resulting from this Mala creates a gulf between the individual self and the Supreme Self, never to be bridged over unless the Mala vanishes.

On the bases of the three kinds of Mala alluded to above, the teachers of this School of Philosophy hold that there are three kinds of Creation technically called Sakal, Pralayākal and Vijñānākal, which respectively signify those wherein the Jīva is enwrapped with Āṇava, Māyīya, and Kārma; Māyīya and Kārma; and Āṇava. Sakal being the mundane state of existence which we belong to, the last two, viz. Pralayākal and Vijñānākal, may well be termed as the two stages of evolution of the individual self before he can recognise his identity with Parama Shiva.

The reader will also find herein a brief explanation of the significance of the six 'Kañchukās'[2] or sheaths of the Purusha (the principles of subjective limitation), and

1. See my introduction on the Parā-Trimshika, forming Vol. XVIII of this Series.

2. These are none other than some of the 'forms of perception and conception', as discovered by Kant.

of the five-fold power and glory of Parama Shiva, as also of their relation with the six ways (Adhvāns[1]) leading to recognition.

The author concludes his thesis with a description of the four classes of animate objects, viz. those born of the womb, the egg, the earth (by cross multiplication), and sweats. He also discusses the development of semen into flesh, blood, arteries, bones etc. He further proceeds to determine the manner in which the young are developed in the womb till they are born. One more interesting point for the reader to know consists in the fact that while delineating the four stages of life—infancy, childhood, youth and old age—the author dwells, briefly, on the doctrines of Karma and Transmigration of the Soul.

Bound in the same cover is another booklet, entitled the Amaraugha-Shāsan, by one Siddha Goraksha Nātha. We cannot say definitely whether this is the same person as Goraksha Nātha, the founder of the Jogi Sect, as nothing is known of this Siddha or of the age in which he lived.

There is only one MS. in Shāradā characters, obtained by me in Agra along with a copy of the Janma Maraṇa Vichāra and others, which this first edition of the Amaraugha-Shāsan is based upon, all attempts to secure a second MS. having resulted in utter failure. The MS. seems to have been copied out about the year 1525 A. D.

As in the Svachchhanda Tantra and other leading Shaiva Shāstras, the various ways for attainment of Yoga (lit. union, i. e., Union with the Supreme Self) have been dwelt upon under various heads; in exactly the same manner, the author of the Amaraugha-Shāsan gives a more or less detailed description of all the arteries of the body. Of these arteries the three important ones, viz. Iḍā, Pingalā and Sushumnā, being respectively

1. See my Abstract of the Tantrasāra.

related, in their specific functions, to the Moon, the Sun and the Fire, are the three peculiar receptacles of the Prāṇa (vital spirit) in the practice of Yoga. The Prāṇa is first caused to rise from the fundaments and enter gradually the navel, the heart, the throat, the soft palate and finally the Brahma-randhra, 'Brahma's crevice,' a suture or aperture in the crown of the head. The stability of this practice confines the mind to its narrowest limits, I mean only those leading to approach towards Parama Shiva, i. e. the highest Reality, as it is termed in the Shaiva Philosophy. The mind, being restricted to its proper sphere, becomes sound enough to partake of the Somakalā juice, as it is technically called, signifying the life-and-beauty-giving product of the lotus-shaped Brahmarandhra. In this booklet have been described, in clear detail, the various stages of perfection in Yoga, viz. the Sāraṇā, Parā-Sāraṇā, Prati-Sāraṇā, Shankha-Sāraṇā, Mahā-Sāraṇā etc., leading to the attainment of Moksha, or absolute freedom from temporal pains and pleasures.

Moreover, the author goes on to epitomise the enumeration, forms, positions, qualities etc., in order of their respective functions, of the five Mahābhūtās (gross elements); of their Tanmātrās (essences), such as sound, touch etc. and their qualities; of the ten Prāṇās (vital spirits); of the various arteries of the body, beginning from the principal Iḍā artery; of the latter's relation with the Moon, the Sun and the Fire; of the ten essential ingredients of the body, viz. the seven fluids—chyle, blood, flesh, fat, bone, marrow and semen, as also three other constituents, viz. hair, skin and sinews.

Finally, I leave it to the indulgence of the reader to pass over any demerits that I may have shown in prefacing this little, but deeply philosophical book.

Srinagar,
Kashmir.
The 18th Jan., 1919.

Mahāmahopādhyāya,
PAṆḌIT MUKUND RĀM SHÂSTRI.

ओं तत्सत्संविद्वपुषे अमृतेश्वराय नमः ।

अथेयं

जन्ममरणविचारग्रन्थस्य

भूमिका

(ग्रन्थाङ्कः १९)

अयं ग्रन्थः शैवागमग्रन्थेषु मुख्यविषयस्यात्माद्वैतज्ञानपद्धतिसारसंक्षेपरूपतया श्रीमद्वामदेवाख्यमहामाहेश्वराचार्यवरेण विरचितः । श्रीमद्वामदेवश्च श्रीयोगीश्वरापरपर्याययोगराजाचार्यस्य शिष्योऽभूत् ।

श्रीयोगराजः श्रीमदभिनवगुप्ताचार्यशिष्य-श्रीक्षेमराजाचार्यस्य शिष्यः श्रीमदभिनवगुप्ताचार्यविरचितशैवागमविशेषपरमार्थसारग्रन्थटीकाकृत् तदन्ते स्वगुरूणामभिख्यानादिकं निर्दिष्टवान् ।

तस्मात्साक्षात्तयास्य ग्रन्थस्य विरचनकालानाम्नायेऽपि श्रीमदभिनवगुप्ताचार्याणां कलियुगद्वाचत्वारिंशशत्यान्तःकालमभिव्याप्य लोके स्थितिसत्तया तच्छिष्य-क्षेमराजस्योत्तरसमकालिकत्वेऽपि तच्छिष्य-योगराज-तच्छिष्यैतद्ग्रन्थकर्तृणां विंशतिर्विंशतिप्रायाब्दोत्तरकालगणनया तथा अनन्तदेवराजस्य काश्मीरसौराज्यकाले वामदेवाचार्यस्थितिजनश्रुत्या च अनुमितो द्वाचत्वारिंशशत्यान्त्यभागवर्ती एतद्ग्रन्थकृत्संभवकालः संभाव्यते ।

अतस्तदनुसार्येव (कलियुगद्वाचत्वारिंशशत्यान्त्यभागकालः) एतद्ग्रन्थविरचनकालः ।

अस्य ग्रन्थस्य मूलादर्शपुस्तकमेकमात्रमेवोपलक्ष्यते, अतिप्रयत्न-विधानेनापि कुतश्चनाप्यन्यन्नावापि ।

तदेतदेकमपि तन्त्रसारग्रन्थभूमिकायां वर्णिततद्वृत्तस्य आगराप्रदेशादवाप्तप्रत्नतरशारदाक्षराङ्कितकाश्मीरिकपुस्तकसमुदायस्य मध्यत उक्ततन्त्रसारग्रन्थसमैकबन्धेषु पुस्तकेष्वेकतमं पण्डितकृष्णस्वामिनाम्ना काश्मीरिकविद्वद्विशेषेण ४६०३ समीपवर्तिलौकिकसंवत्सरे लिखितं समस्ति इति ॥

अस्ति चाकृत्या लघावप्यस्मिन्ग्रन्थे श्रीस्वच्छन्दतन्त्र-तन्त्रालोकादिविस्तीर्णशैवागमग्रन्थेषु यथायथं वितत्य निर्णीतानां मुख्यविषयस्वात्माद्वैतज्ञानसंसाधकपद्धतीनां यथोपयोगं भिन्नतया स्थाने स्थाने प्रतिपादितानां समग्रविषयाणां पूर्णोपज्ञानस्यैकत्र-संगृह्य सुगमसंक्षिप्तमार्गप्रदर्शनम् ।

तद्यथा—

(१) प्रथमतः संविदात्मनः परमशिवस्य स्वातन्त्र्योद्भावितनिखिलजगदात्मत्वेऽपि सर्वोत्तीर्णताद्योतिनिरतिशयस्वातन्त्र्यादिशक्तिमत्तया प्रकाशस्वरूपताप्रतिपादनम् ।

(२) चिदानन्देच्छाज्ञानक्रियाख्यानां परमशिवसंबन्धिपञ्चशक्तीनां स्वरूपानुशासनम् ।

(३) विश्वं सिसृक्षोः प्रकाशात्मपरमशिवस्य, तस्य स्वात्मनः संकुचितरूपावविभासयिषया अणुत्वरूपावस्थाननिर्णयः ।

(४) उक्ताणुतावस्थापत्तौ च देशकालाद्युपाधिविरहिततया अनुत्तरानन्दपरिस्पन्दात्मकस्य भगवतो न कापि क्षतिः प्रत्युत परममहिम्नः पुष्टिः—इत्येतत्प्रतिपादनम् ।

(५) तस्यैव धरादितत्त्वानुबन्धिन्याः विज्ञानाकल-प्रलयाकल-सकलात्मकतायाः समापत्तिनिर्देशः।

(६) अणोः स्वस्वरूपाच्छादकस्य माया-कला-विद्या-राग-काल-नियतिरूपकञ्चुकषट्कस्य तत्कर्मणश्च प्रतिपादनम्।

(७) भुवन-तत्त्व-कलाख्यप्रमेयत्रय-पद-मन्त्र-वर्णाख्य-प्रमाणत्रयसंकलितषडध्वयोगिनो निवृत्ति-प्रतिष्ठा-विद्या-शान्ता-शान्त्यतीताख्यस्य पारमेशशक्ति-(कला) पञ्चकस्य तदधिष्ठानादेश्च निर्देशनम्।

(८) अनन्तरं च आणवावस्थामाश्रितस्य भगवतो, विचित्र-जात्यायुर्भोगैः जरायुजाण्डजोद्भिदजस्वेदजादिजन्तुजातं प्रादुर्भावयतः उपभुक्तान्नपानपाकवशाद्रसरूपावस्थितरक्तमांसमेदोऽस्थिमज्जात्मना शुक्रधातौ विश्रान्तिप्रदर्शनोत्तरं स्त्रीपुंसादिरूपतयोद्भवन्मनुष्यपशुपक्षितरुदंशादिशरीरसंबन्ध्यनुरूपनाड्याद्यङ्गप्रत्यङ्गसंधितत्संख्यानोत्तरोत्तरतदुपचयगर्भस्थितिजन्मतदनुवर्तिबाल्याद्यवस्थानतदनुभूयमानहर्षशोकादिनिर्णयमनु पुनर्जन्मसदसत्कर्मोदर्कसदसल्लोकावाप्तिसमनुशासनपूर्वकं स्वात्मस्वरूपावाप्त्युपायज्ञानमार्गप्रकाशनं संगृह्य प्रतिपादितं समस्ति।

तदेतस्य पुस्तकस्य संग्रहणोत्तरं समाधानेन विमर्शनाभ्यासात् तत्त्वज्ञानफलरसास्वादमधिगच्छन्तु सहृदयाः सद्विद्वांसः, सफलयन्तु चैतत्संस्करणोत्तरप्रकाशनप्रयत्नं मामकीनमित्याशासे।

इति निवेदकः

म० म० पं० मुकुन्दराम-शास्त्री=

ॐ नमः शिवायामृतवपुषे ।

अथ

जन्ममरणविचारग्रन्थः ।

श्रीमद्भट्टवामदेवाचार्यविरचितः ।

सान्द्रोद्रेकक्षुभितमभितः स्वान्तमन्तर्नियम्य
प्रायो धत्ते नवनवरसोल्लेखमानन्दकन्दम् ।
भूयो भूयः प्रलयविभवोद्दामदुःखान्तरायो
योऽसावन्तर्जयति हृदये कोऽपि संविद्विकासः १

इह खलु निखिलजगदात्मा सर्वोत्तीर्णश्च सर्वमयश्च विकल्पासंकुचितसंवित्प्रकाशरूपः, अनवच्छिन्नचिदानन्दविश्रान्तः प्रसरदविरलविचित्रपञ्चवाहवाहवाहिनीमहोदधिः, निरतिशयस्वातन्त्र्यसीमनि प्रगल्भमानः सर्वशक्तिखचित एक एव अस्ति संविदात्मा महेश्वरः । तस्य प्रकाशरूपता चिच्छक्तिः, स्वातन्त्र्यम् आनन्दशक्तिः, तच्चमत्कारः इच्छाशक्तिः, आमर्शात्मकता ज्ञानशक्तिः, सर्वाकारयोगित्वं क्रिया-

शक्तिः इति । इत्थं सर्वशक्तियोगेऽपि आभिमुख्याभिः शक्तिभिरुपचर्यते, स च भगवान् स्वातन्त्र्यशक्तिमहिम्ना स्वात्मानं संकुचितमिव आभासयन् 'अणुः' इति उच्यते । यथोक्तम्

'व्यापको हि शिवः स्वेच्छाक्लृप्तसंकोचमुद्रणात् ।
विचित्रफलकर्मौघवशात्तत्तच्छरीरभाक् ॥'

इति, निजस्वरूपगोपनकेलिलोलम् एवं माहेशशक्तिपरिस्पन्दं प्रवरगुरवः प्रतिपेदिरे । तथा च आहुः

'अतिदुर्घटकारित्वात्स्वाच्छन्द्यान्निर्मलादसौ ।
स्वात्मप्रच्छादनक्रीडापण्डितः परमेश्वरः ॥
अनावृते स्वरूपेऽपि यदात्माच्छादनं विभोः ।
सैवाविद्या यतो भेद एतावान्विश्ववृत्तिकः ॥'

इति । न च एतावता भगवतो देशकालाकारोपाधिविरहितनिरतिशयानन्दपरिस्पन्दात्मकस्य काचिदपि क्षतिः प्रत्युत परममहिम्नः परिपुष्टिरित्युक्तम् ।

'अस्थास्यदेकरूपेण वपुषा चेन्महेश्वरः ।
महेश्वरत्वं संवित्त्वं तदत्यक्ष्यद्घटादिवत् ॥'

परिच्छिन्नप्रकाशत्वं जडस्य किल लक्षणम् ।
जडाद्विलक्षणो बोधो यतो न परिमीयते ॥
तेन बोधमहासिन्धोरुल्लासिन्यः स्वशक्तयः ।
आश्रयन्त्यूर्मय इव स्वात्मसंघट्टचित्रताम् ॥'

इत्यादि । तदेवम् असौ भगवान् स्वमायाशक्त्याख्येन अव्यभिचरितस्वातन्त्र्यशक्तिमहिम्ना स्वात्मनैव आत्मानं संकुचितमिव अवभासयन् विज्ञानाकलः प्रलयाकलः सकलश्च संपद्यते । तत्र आणवेन एकेनैव मलेन संयुक्तो विज्ञानाकल उच्यते, द्वाभ्याम् आणवमायीयाभ्याम् अपवेद्यः प्रलयाकलः, त्रिभिराणवमायीयकार्मैः संवेद्यः तैरेव कलादि-धरण्यन्ततत्त्वमयः सकलः, तदर्थमेव अयमर्थसर्गः । तत्र सृष्ट्युन्मुखो भगवान् शुद्धाध्वनि वर्तमानः स्वशक्तिभिः मायां विक्षोभ्य कलातत्त्वं किंचित्कर्तृत्वलक्षणं पुद्गलस्य सृजति, ततोऽपि किंचिदवबोधाख्यं विद्यातत्त्वं, किंचिदभिलाषरूपं च रागतत्त्वं, तदेतत्सरागं कर्तृतत्त्वं, भूतभविष्यद्वर्तमानतया त्रिधा अवच्छिद्यते तत् कालतत्त्वं, तुल्यत्वेऽपि रागे येन कर्तृत्वस्य

अवच्छेदः क्रियते तत् नियतितत्त्वं, तदेतत् कञ्चुकषट्कम् अन्तर्मलावृतस्य पुद्गलस्य बहिराच्छादकम्, उक्तं च चिल्लाचक्रेश्वरमते

'माया कला शुद्धविद्या रागकालौ नियन्त्रणा ।
षडेतान्यावृतिवशात्कञ्चुकानि मितात्मनः ॥
एवं च पुद्गलस्यान्तर्मलः कञ्चुकवत्स्थितः ।
तुषवत्कञ्चुकानि स्युस्तस्माज्ज्ञानक्रियोज्झितः ॥'

इति । सा च कला पुरुषस्य परिमितं कर्तृत्वं प्रकाश्य सुखदुःखमोहरूपं भोग्यम् अव्यक्तत्वं सृजति, ततोऽपि अष्टगुणं बुद्धितत्त्वम् उत्पन्नं, ततोऽपि सात्त्विकराजसतामसभेदभिन्नं त्रिस्कन्धम् अहंकारतत्त्वम्, तत्र पूर्वस्मात् अहंकारात् मनो जातं, अपरस्मात् इन्द्रियाणि, तृतीयात् तन्मात्राणि, एभ्यो भूतानि—इत्येवमयम् एकस्यैव आदिदेवस्य स्वातन्त्र्यमहिम्ना संसारे संसरतः परिमितप्रमातृताम् अवलम्बमानस्य तत्त्वप्रसरः, उक्तं च

'भूतानि तन्मात्रगणेन्द्रियाणि
मूलं पुमान्कञ्चुकयुक्सुशुद्धम् ।
विद्यादिशक्त्यन्तमियान्स्वसंवित्-
सिन्धोस्तरङ्गप्रसरप्रपञ्चः ॥'

तथा

'सअल उत्त पुरिसुण्ण उ
सअह्लउत्त उत्तिण्णा ।
परि आणह् अत्ताण उ
परि ससिबेण समाण उ ॥'

इति । एतेषां च उक्तरूपाणां तत्त्वानां प्रमातृभेदे वैचित्र्यात् प्रमेयवैचित्र्यं भवति इति श्रीपूर्वशास्त्रे कथितम्, तथाहि

'शक्तिमच्छक्तिभेदेन धरातत्त्वं विभिद्यते ।
स्वरूपसहितं तच्च विज्ञेयं दशपञ्चधा ॥
अनेनैव विधानेन पुंस्तत्त्वात्तु कलान्तिकम् ।
त्रयोदशविधं ज्ञेयं रूपवत्यलयाकलः ॥
तद्वन्मायापि विज्ञेया नवधा ज्ञानकेवलः ।
मन्त्राः सप्तविधास्तद्वत्पञ्चधा मन्त्रनायकाः ॥
त्रिधा मन्त्रेश्वरेशानाः शिवः साक्षान्न भिद्यते ।
यः पुनः सर्वतत्त्वानि वेत्त्येतानि यथार्थतः ॥
स गुरुर्मत्समः प्रोक्तो मन्त्रवीर्यप्रकाशकः ।
दृष्टाः संभाषितास्तेन स्पृष्टाश्च प्रीतचेतसा ॥
नराः पापैः प्रमुच्यन्ते सप्तजन्मकृतैरपि ।'

इति । तदेवम् अनेकावसायोऽयं तत्त्वक्रमः । एतेषां च तत्त्वानां वर्गशो यदनुगामि रूपम्

एकरूपम्–एकरूपकलनासहिष्णुत्वात् सा कला कथ्यते । तथा हि

'निवर्तन्ते यतस्तत्त्ववर्गाः
सा निवृत्तिर्नाम कला ।'

सा च पृथिव्यामेव व्यवस्थिता ।

'कारणत्वे पूरणाप्यायकारित्वात्
प्रतिष्ठा नाम कला उच्यते ।'

सा च जलादिमूलान्तं व्याप्य व्यवस्थिता ।

'वेद्यविलये संविदाधिक्यात्
विद्या नाम कला ।'

सा च पुमादिमायान्तम् अध्वानम् अध्यास्ते ।

'कञ्चुकतरङ्गोपशमात् शान्ता
नाम कला उच्यते ।'

सा च शुद्धविद्यादिशक्त्यन्ते स्थिता इति । एतदेव अण्डचतुष्टयं पार्थिवप्राकृतमायीयशाक्तलक्षणम् ।

'सर्वातीतत्वात् शिवतत्त्वे शान्त्यतीता ।'

इति । परं तु तत्त्वं स्वतन्त्रत्वात् कलातीतम्, आसामेव कलानां तत्त्ववदन्तर्भूतानि भुवनान्यपि बोद्धव्यानि, एवं स्थूलसूक्ष्मपर-

त्वेन भुवनतत्त्वकलारूपं त्रिविधरूपं प्रमेयम् उक्तम्, प्रमाणमपि तथैव पद-मन्त्र-वर्णतया त्रिविधमेव—इति एकस्यैव पूर्णप्रमातुः स्वातन्त्र्यात् संसरतः षड्विधे अध्वनि विश्रान्तिरुक्ता। भवन्ति चात्र दीक्षापरिघटनसंग्रहश्लोकाः

'पदमन्त्रवर्णमेकं
पुरषोडशकं धरेति च निवृत्तिः।
तत्त्वार्णमग्निनयनं
रसशरपुरमस्त्रमन्त्रपदमन्या॥
मुनितत्त्वार्णं द्विकपद-
मन्त्रं वस्वक्षिभुवनमपरकला।
अग्न्यर्णतत्त्वमेकक-
पदमन्त्रं सैकभुवनमिति तुर्या॥
षोडश वर्णाः पदमन्त्र-
तत्त्वमेकं च शान्त्यतीतेयम्॥'

इति। तदेवम् आणवीं वृत्तिम् आलम्ब्य भगवान् विचित्रैः जात्यायुर्भोगैः जरायुज-अण्डज-उद्भेदज-स्वेदजादिजातं प्रादुर्भावयति। तत्र उपभुक्तस्य अन्नपानस्य पाकवशात् रसरूपतया स्थितस्य रक्तमांसमेदोऽस्थि-मज्जात्मना शुक्रधातौ विश्रान्तिर्भवति, तत्र

इमाः प्रजाः प्रजायन्ते । तथा चोक्तं सौश्रुते 'इह खलु पाञ्चभौतिकस्य चतुर्विधस्य आहारस्य षड्रसोपेतस्य द्विविधरसवीर्यस्य अष्टविधरसवीर्यस्य अनेकप्रकारोपभुक्तस्य परिणतस्य यस्तेजोरूपः सारः सूक्ष्मः स रस इत्युच्यते, तस्य हृदयं स्थानं, स च हृदयात् चतुर्विंशतिधमनीरनुप्रविश्य ऊर्ध्वगा दश, दश च अधोगामिनीः, चतस्रः तिर्यग्गाः, सकलं शरीरम् अहरहस्तर्पयति जीवयति धारयति वर्धयति, अदृष्टनिमित्तेन कर्मणा स खलु आप्यो रसो यकृत्प्लीहादिं प्राप्य रागमुपैति, भवन्ति वा अत्र श्लोकाः

रञ्जितास्तेजसा त्वापः शरीरस्थेन देहिनाम् ।
अव्यापन्नाः प्रसन्नेन रक्तमित्येव तद्विदुः ॥
रसादेव स्त्रियो रक्तं रजःसंज्ञं प्रवर्तते ।
तद्वर्षाद्द्वादशादूर्ध्वं याति पञ्चाशतिः क्षितिम् ॥

आर्तवं शोणितम् आग्नेयम् – अग्नीषोमीयत्वात् गर्भस्य ।

रसाद्रक्तं ततो मांसं मांसान्मेदश्च जायते ।
मेदसोऽस्थि ततो मज्जा मज्जातः शुक्रसंभवः ॥
एवं मासेन शुक्रत्वं रसो याति यथाक्रमम् ।
स्त्रीणां तथैव मासेन भवेदार्तवसंभवः ॥'

इति । तदेवंभूते मातापितृसंबन्धसंभूते अग्नीषोमात्मके रक्तरेतसी कुसुमसमयादनन्तरं

जननीजठरे रेतः कलिलीभवति, ततो बुद्बुदम्, ततः पेशी, ततो घनः यावदङ्गपरिग्रहः, अङ्गव्यक्तिः संविदुल्लासः सर्वाङ्गसंपत्तिरोजःसंचारः सुखदुःखसंवित्तिरिति यावत् प्रजायते । उक्तं श्रीचिल्लाचक्रेश्वरमते

'सोमसूर्यरसोल्लासपरस्परनिघर्षणात् ।
जातवेदसि संजाते मध्यधामविकासिनि ॥
वीरारुणपरीणामवशादङ्कुरसंभवः ।
एकरात्रोषितं रेतः सिक्तं कलिलतां व्रजेत् ॥
बुद्बुदं सप्तरात्रेण पेशी मासेन जायते ।
द्वितीये मासि च घनस्तृतीयेऽग्निपरिग्रहः ॥
चतुर्थे व्यङ्गताङ्गानां चेतना पञ्चमे भवेत् ।
षष्ठे सर्वाङ्गसंभेदः सप्तमे चलनोद्गमः ॥
तेजोऽष्टमे संचरति नवमे वेदनं भवेत् ।
संपूर्णदेहो दशमे मासि जन्तुः प्रजायते ॥
जातोऽसौ वायुना स्पृष्टो योनियन्त्रप्रपीडितः
न स्मरत्युग्रसंतापमनेकभवसंभवम् ॥
क्रमेण वृद्धिमायान्ति तस्यैते देहहेतवः ।
रसः स्थितिं प्रकुरुते रक्तं संजीवयत्यलम् ॥
मांसं बृंहयति प्रायो मेदः स्नेहयति स्फुटम् ।
धारयन्ति तथास्थीनि मज्जान्तःसारसंश्रया ॥
हर्षोत्कर्षकरं शुक्रं मूत्रं क्लेदविवेककृत् ।
वाय्वग्निसंरोधकरं पुरीषं परिकीर्तितम् ॥

स्वेदक्लेदोपकरणं गर्भहेतुरथार्तवम् ।
एवं शरीरमासाद्य षाट्कोशं तत्परिग्रहात् ॥
अनपेक्ष्य निजं भावं पुमान्भावानपेक्षते ॥'

इति । अयमेव च अर्थो निरुक्तिकृतापि

'उक्तपार्थिवान् अष्टौ गुणान् विद्यात्, त्रीन् मातृतः त्रीन् पितृतः'

इत्याद्युपक्रम्य उक्तः। अत्रैव इदं पुंस्त्रीनपुंसक-लक्षणं प्रकृतित्रयकारणम्

'सोमाधिक्येन पुंजन्म सूर्याधिक्येन योषितः ।
साम्यात्क्लीबस्तु वातेन भेदात्स्याद्बह्वपत्यता ॥'

इति । अवयवभेदोऽपि

'नवमे दशमे मासि प्रबलैः सूतिमारुतैः ।
निःसार्यते बाण इव यन्त्रच्छिद्रेण सज्वरः ॥
तस्य षोढा शरीरं तत्षट् त्वचो धारयन्ति च ।
अस्थ्नां तथा षष्ट्यधिकं विनिबद्धं शतत्रयम् ॥
स्थूलैः सह चतुःषष्टिर्दशना विंशतिर्नखाः ।
पाणिपादशलाकाश्च तासां स्थाने चतुष्टयम् ॥
षष्ट्यङ्गुलीनां द्वे पार्ष्णी गुल्फेषु च चतुष्टयम् ।
चत्वार्यरत्निकास्थीनि जंघयोस्तावदेव तु ।
द्वे द्वे जानुकपोलोरुफलकांससमुद्भवे ।
अक्षिस्थलूषके श्रोणीफलके च विनिर्दिशेत् ॥
भगास्थ्येकं तथा पृष्ठे चत्वारिंशच्च पञ्च च ।
ग्रीवा पञ्चदशास्थीनि जत्र्वेकं च तथा हनुः ॥

तन्मूले द्वे ललाटाक्षिगण्डनासाघनास्थिका।
पर्शुकास्तलकैः सार्धमर्बुदे च द्विसप्ततिः॥
द्वौ शङ्खकौ कपालानि चत्वार्येव शिरस्तथा।
उरः पञ्चदशास्थीनि पुरुषस्यास्थिसंग्रहः॥'

इति। एतेष्वेव कपालभरणतुरुण्डरुण्डरुचकनलयष्टीलनलकभेदेन अभिधानानि शास्त्रान्तरेषु उक्तानि। स्थानान्तराणि आह

'वसावपावहननं नाभिक्लोमयकृत्प्लिहा।
क्षुद्रान्त्रवृक्कशको वस्तिः पुरीषापान एव च॥
आमाशयोऽथ हृदयं स्थूलान्त्रं गुदमेव च।
उत्तरौ च गुदौ कोष्ठौ विस्तारोऽयमुदाहृतः॥
कनीनिके साक्षिकूटे शष्कुली कर्णपुत्रिके।
गण्डौ शङ्खौ भ्रुवौ कष्टवेष्टावोष्ठौ कुकुन्दरे॥
वङ्क्षणौ वृषणौ वृक्कौ श्लेष्मसंघातिकौ स्तनौ।
उपजिह्वास्फिजौ जिह्वाजंघे चोरू च पिण्डिके॥
तालूदरवस्तिशीर्षे चिबुके गलशुण्डिके।
अक्षिपक्ष्मचतुष्कं च पद्वस्तहृदयानि तु॥
अष्टश्चैवमादीनि स्थानान्यत्र शारीरके।
नवच्छिद्राणि तान्येव प्राणस्यायतनानि च॥
धमनीनां शते द्वे तु पञ्चपेशीशतानि च।'

इति।

'स्त्रीणां च स्तनयोर्गर्तादष्टात्रिंशदधिकाः
सप्तेश्यो धमन्यो भवन्ति'

इति सौश्रुतः ।

'एकान्नत्रिंशल्लक्षाणि नव स्नायुशतानि च ।
षट्पञ्चशानि तु ज्ञेया सिरा धमनिसन्ततिः ॥
सप्तोत्तरं मर्मशतं द्वे तु संधिशते तथा ।
लोम्नां कोट्यस्तु पञ्चाशच्चतस्रः कोट्य एव च ॥
रसस्य नव विज्ञेया जलस्याञ्जलयो दश ।
सप्त वै तु पुरीषस्य रक्तस्याष्टौ प्रकीर्तिताः ॥
श्लेष्मा षट्च्च पित्तं च चत्वारो मूत्रमेव च ।
वसात्रयं च द्वौ मेदो मज्जैकार्धं च मस्तके ॥
श्लेष्मौजसस्तावदेव रेतसस्तावदेव च ।
इत्येतदस्थिरं वर्ष्म यस्य मोक्षाय कृत्यसौ ॥'

इति स्वस्थस्य सौम्यधातोरेवम् । अन्यथा तु

'वैलक्षण्याच्छरीराणामस्वस्थत्वात्तथैव च ।
दोषधातुमलानां च परिमाणं न विद्यते ॥'

इत्युक्तम् । तदेतत् विभागेन बीभत्सदर्शनं वैराग्यमुनिभिरगायि, तथा चाहुः

'अस्थिस्थूणं स्नायुयुतं मांसशोणितलेपनम् ।
चर्मावनद्धं दुर्गन्धि पूर्णं मूत्रपुरीषयोः ॥
जराशोकसमाविष्टं रोगायतनमातुरम् ।
रजस्वलमनित्यं च भूतावासमिमं त्यजेत् ॥'

मुनिः पाराशर्योऽपि आह

'सर्वाशुचिनिधानस्य कृतघ्नस्य विनाशिनः ।
शरीरकस्यापि कृते मूढाः पापानि कुर्वते ॥
आहारैर्नीयमानाय क्रमाहुःखेन रम्यताम् ।
को हि नाम शरीराय धर्मापेतं समाचरेत् ॥'

इति । एवं शरीरमुक्त्वा शरीरिस्वरूपमुच्यते

'द्वासप्ततिसहस्राणि हृदयादभिनिःसृताः ।
हिता नामाहिता नाड्यस्तासां मध्ये शशिप्रभम् ॥
मण्डलं तस्य मध्यस्थ आत्मा दीप इवाचलः ।
स ज्ञेयस्तं विदित्वेह पुनराजायते न तु ॥'

इदमत्र तात्पर्यम्—तं तथाभूतमात्मानं विदित्वा नरो न जन्मक्लेशमनुभवति, किंभूतं यद्धृदयोक्तं द्वासप्ततिसंख्यावच्छिन्नं नाडीचक्रं तदन्तरं यत् शशिमण्डलं तदन्तःस्थं, ताश्च नाड्योऽशितपीतरससंचरणाधिकारत्वात् पुण्योपचयेन हिताः तदभावेन अहिताः, तासां संचारक एक एव व्यवहारभेदात् पञ्चभेदो वायुः, तासां च द्वे प्रधाने—दक्षिणोत्तरसंबद्धे अग्नीषोमात्मके, तद्द्वारेण प्राणस्य ऊर्ध्वगमनम्

अहः, अधोऽपानस्य रात्रिः, एतेन अर्धमास-मासर्तुवत्सरादिकालविभागोऽपि व्याख्यातः, समप्राणचारो विषुवत् तयोर्मध्ये तृतीया दण्डाकारा ब्रह्मनाडी स्थिता, तत्र निरुद्धप्राणो योगी दीपाकारम् आत्मानं पश्यति इति, अत एवोक्तं

'सम्यग्दर्शनसंपन्नः कर्मभिर्न स बध्यते ।
दर्शनेन विहीनस्तु संसारं प्रतिपद्यते ॥'

इति । संसारप्रवृत्तौ च तस्य कलातो विषय-विभेदो मुनिभिरुक्तः, तथाहि

'परद्रव्याण्यभिध्यायंस्तथानिष्टानि चिन्तयन् ।
वितथाभिनिवेशी च जायतेऽन्त्यासु योनिषु ॥
पुरुषोऽनृतवादी च पिशुनः पुरुषस्तथा ।
अनिबद्धप्रलापी च मृगपक्षिषु जायते ॥
अदत्तादाननिरतः परदारोपसेवकः ।
हिंसकश्चाविधानेन स्थावरेषूपजायते ॥'

इत्यादि, अयं तु उक्तयातनस्य नियोगः, अद्वयरूपस्य आत्मनः कुतस्त्योऽयं भेदः? इति चेत्—मायामहामोहविकल्पकल्पित इत्याह

'आकाशमेकं हि यथा घटादिषु पृथग्भवेत् ।
तथात्मैकोऽप्यनेकश्च जलाधारेष्विवांशुमान् ॥'

इति । न च अपक्वकषायस्य कदाचिदपि उक्तरूपम् आत्मज्ञानं भवति, तथा च

'मलिनो हि यथादर्शो रूपालोकस्य न क्षमः ।
तथा ह्यपक्वकरण आत्मज्ञानस्य न क्षमः ॥'

इत्याद्युक्तम् । इत्यलं भूयसा उक्तेन । एवम् असौ भगवान् स्वातन्त्र्यशक्तिमहिम्ना पशुदशाम् अवलम्बमानो भोगोपदानप्रवणः संपूर्णदेहप्राणबलः सन् उक्तेन षडध्वजालक्रमेण प्रबुद्धः शरीरपरिग्रहम् आसादयति, क्रमेण भुक्तेषु कर्मसु षड्भिर्भावविकारैर्जरारोगादिभिः काययन्त्रे विघटमाने देहस्तम्भो वेपथुर्नाडीचक्रसंकोचः क्वचिद्विपर्ययेण तद्विकासो मर्मभङ्गः शोष इत्यादि पूर्वसंस्थापनोपमर्दकं सर्वम् उपपद्यते यावत् विनश्यति, विनाशश्च क्षणिकोऽस्य यद्यपि तथापि स्थूलया वृत्त्या दशभिर्दशभिरभिव्यक्तः प्रोक्तः । तथाहि

'बाल्यं वृद्धिर्बलं प्रज्ञा त्वक्चक्षुः श्रोत्रमिन्द्रियम् ।
आसनं शयनं पुंसां दशभिर्दशभिर्व्रजेत् ॥'

इत्युक्तं । ततश्च तस्मिन् शरीरयन्त्रे विघटिते सा संवित् प्राणनात्मताम् अवलम्ब्य आति-

वाहिकेन देहेन देहान्तरं नीयते, ततश्च आतिवाहिकं शरीरकं भूतभविष्यद्देहान्तराले युग्यस्थानीयं संभवति यदारूढोऽसौ पुद्गलः शरीरान्तरासङ्गम् अनुभवति, उक्तं च कोशभाष्ये

'मृत्यूपपत्तिभवयोरन्तरा भवतीह यः ।
गम्यदेशानुषक्तत्वादुपपन्नोऽन्तराभवः ॥
व्रीहिसंतानसाधर्म्यादवच्छिन्नसमुद्भवः ।
प्रतिबिम्बमसिद्धित्वादसाम्याच्च निदर्शनात् ॥
स पुनर्मरणात्पूर्वमुपपत्तिक्षणात्परम् ।
स्वजातिशुद्धकर्माक्षदृश्यकर्मविवेकवान् ॥'

इति । श्रुतिश्च

'द्वे ते चक्रे सूर्ये ब्रह्माण ऋतुथा विदुः ।
अथैकं चक्रं यद्गुहा तदद्धातय इद्विदुः ॥'

इति, अयमर्थः—हे सूर्ये भगवति आत्मशक्ते, ब्रह्माणः ब्रह्मवादिनः, ऋतुथा काले काले, ते तव संबन्धिनी, द्वे चक्रे विदुः चक्रमिव चक्रं परिवर्तसाधर्म्यात् शरीरमुच्यते तयोर्द्वित्वं वर्तमानभाविभेदात्, अतस्तयोरन्तरे कथितया युक्त्या यदेकमातिवाहिकाख्यं तत् गुहा गुप्तम् अनुपलक्ष्यम् इत्यर्थः, अत एव तदद्धातयः

इत् विदुः योगिन एव जानन्ति इति तात्पर्यम् । तथा च जाग्रदवस्थायां दृढकरणस्य प्रमातुरिन्द्रियाणि श्रोत्रादीनि शब्दादयश्च विषया भवन्ति, तथा प्रमेयसमये प्रचलितम् अन्तःकरणमिन्द्रियं यियासुता च विषयः, तामेव यियासुताम् अधिकृत्य प्रवरमुनिः पाराशर्यः समाधितवान्

'यं यं वापि स्मरन्भावं त्यजत्यन्ते कलेवरम् ।
तं तमेवैति कौन्तेय सदा तद्भावभावितः ॥'

इति । अयमत्र संक्षेपार्थः—संभवभोगः जन्मभोगः स्थितिभोगश्च इति तिस्रः शरीरस्य प्रागवस्था भवन्ति हि, तथाहि—जठरे चेतनायां संजातायां गर्भभोगः, प्रसवसमये जन्मभोगः, प्रसूतस्य बाल्यादिवयःपरावृत्त्या विचित्रः स्थितिभोगः। मृतिभोगः यियासुता च द्वे चरमावस्थे, तत्र मृतिभोगः विचित्रा शरीरपीडा, यियासुता आतिवाहिकशरीरसंबद्धा, तामेव च यियासुतामुद्दिश्य,

'यं यं वापि स्मरन्भावम् .... ।'

इत्यादि प्रवृत्तं, अत एव भूतभविष्यदर्थहिता-

र्थवादिनः स्मरन्निति शब्दप्रत्ययस्य यथार्थः प्रयोगः स्यात्, एतदेव च वितत्य श्रीतन्त्रालोके प्रतिपादितम्

'मृतिभोगः समस्तोऽयं मर्मच्छिन्मूढताक्षगः ।
तत्रेन्द्रियाणां संमोहः श्वासायासपरीतता ॥
यस्त्वसौ क्षण एवैकश्चरमः प्राणनात्मकः ।
सा देहत्यागकालांशकला प्राणवियोगिनी ॥
तस्यां यदेव स्मरति प्राक्संस्कारप्रबोधतः ।
तदेव रूपमभ्येति सुखदुःखविमोहितम् ॥'

इति । अत्र च विषयनैयत्येन विभागो व्यासमुनिनैव कृतः ।

'यदा सत्त्वे विवृद्धे तु प्रलयं याति देहभृत् ।'

इत्यादिना ग्रन्थेन । ता एताः शरीरावस्थाः

'पञ्चारे चक्रे परिवर्तमाने तस्मिन्नात-
स्थुर्भुवनानि विश्वा ।'

इत्यादिश्रुतावुक्ताः । अन्यत्रापि

'संभवो जन्म सत्ता च मृतिश्चाथ यियासुता ।
एताः पञ्च शरीरस्य परिणामविपत्तयः ॥'

इत्युक्तम् । एतदेवमुक्तरूपेण असौ आतिवाहिकेन देहेन देहान्तरं नीयते, सोऽपि देहः सुप्तोत्थितात् प्रबोधम् अवाप्य प्राणिति,

उक्तेन चक्रेण सोऽपि विनश्यति, यावत् अरघट्टघटीयन्त्रवत् परिवर्तमानोऽणुः नानाकायनिकायैः संसरति संसारे । तथा च श्रुतिः

'सस्यमिव मर्त्यः पच्यते सस्यमिव जायते पुनः ।'

इति ।

'वासांसि जीर्णानि यथा विहाय ।'

इत्यादिना व्यासमुनिनापि एतदुक्तम् ।

अथ कदाचित्परमेश्वरानुग्रहशक्तिपातपवित्रितः केनापि दीक्षादिना उपायेन संविदानन्दविश्रान्तम् अद्वयं निजं रूपं परामृशति, ततः स्वरूपमालम्बते, यथोक्तं श्रीमालिनीविजये

'एवमस्यात्मनः काले कस्मिंश्चिद्योग्यतावशात् ।'

इत्युपक्रम्य

'तत्क्षणाद्वोपभोगाद्वा देहपाते शिवं व्रजेत् ।'

इत्येवमन्तेन ग्रन्थेन । यद्वा क्वापि परमेश्वरायतने शरीरम् अतिवाह्य पूर्वे विधौ क्रमेण परमेश्वरीभवति, तदुक्तं श्रीसात्त्वतायाम्

'प्रासादद्वारदेशाच्च यत्र शङ्खध्वनिश्चरन् ।
प्रयाति सर्वतो दिक्षु तत्क्षेत्रं वैष्णवं मतम् ॥
मुनिप्रणीताद्द्विगुणं तदेव परिकीर्तितम् ।
सिद्धावतारिताद्देवात्तदेव त्रिगुणं स्मृतम् ॥

चतुर्गुणं स्वयं व्यक्ताद्देहान्ते भावितात्मनाम्।
फलं सायुज्यतापूर्वं विज्ञेयं तु क्रमात्ततः॥
दुष्टेन्द्रियवशाच्चित्तं नृणां यत्कल्मषेरितम्।
तदन्तकाले संशुद्धिं याति नारायणालये॥'

इति। श्रीमदमृतेशशिखायामपि

'ये तु तत्त्वावतीर्णानां शङ्कराज्ञानुवर्तिनाम्।
स्वयंभूमुनिदेवर्षिमनुजादिभुवां गृहे॥
मृतास्ते तत्पुरं प्राप्य पुरेशैर्दीक्षिताः क्रमात्।
मर्त्येऽवतीर्य वा नावा प्रयान्ति परमं पदम्॥
तत्र स्वयंभुवो द्वेधा केऽप्यनुग्रहतत्पराः।
केऽपि स्वकार्येणायाताः पूर्वे निर्वाणदायिनः॥'

इति। तत्रापि न सर्वस्य मोक्ष इत्युक्तम्,

'पशुमात्रस्य सालोक्यं सामीप्यं दीक्षितस्य तु।
तत्परस्य तु सायुज्यमित्याज्ञा पारमेश्वरी॥
यस्तूर्ध्वशास्त्रगस्तत्र त्यक्तास्थः संशयेन सः।
व्रजेदायतनं नैव स फलं किंचिदश्नुते॥
दीक्षायतनविज्ञानद्वेषिणो ये तु चेतसा।
आचरन्ति च तत्ते वै सर्वे निरयगामिनः॥
ये च स्वभ्यस्तविज्ञानमयाः शिवमया हि ते।
जीवन्मुक्ता न तेषां स्यान्मृतौ कापि विचारणा॥'

इति। अत एव उक्तं श्रीनिशाटने

'गोदोहमिषुपातं वा नयनोन्मीलनं च वा।
सम्यग्युक्तः परे तत्त्वे न भूयो जन्मभाग्भवेत्॥

यस्मात्पूर्वं परे न्यस्तो येनात्मा ब्रह्मणि स्वयम् ।
स्मरणं तु कथं तस्य प्राणान्ते समुपस्थिते॥'

इति । श्रीरामभट्टारकेऽपि

'तावत्क्षेत्रं तथा तीर्थं यावद्ब्रह्मणि नो विशेत् ।
तद्विदित्वा श्वपाकोऽपि मत्समो नात्र संशयः ॥'

इति । भगवता भोगिपतिनापि

'तीर्थे श्वपचगृहे वा
नष्टस्मृतिरपि परित्यजन्देहम् ।
ज्ञानसमकालमुक्तः
कैवल्यं याति हतशोकः ॥'

इति । श्रीमत्पौष्करायामपि उक्तम्

'क्षित्यन्तानां च तत्त्वानां देवत्वेन व्यवस्थितः ।
मन्त्रज्ञो भगवद्भक्तः श्रद्दधानः सदास्तिकः ॥
यत्र यत्राश्रमे चैव निवसेत्संयतेन्द्रियः ।
स्वदेहस्थं स्मरेन्नित्यं स्वमन्त्रं न्यस्तविग्रहः ॥
देहसंन्यासकाले तु विश्रान्तो यत्र कुत्रचित् ।
प्रयाति पदमाद्यं वै समुत्क्रान्तः स्वविग्रहम् ॥'

इति । अन्यत्रापि

'शरीरमेवायतनं नान्यदायतनं व्रजेत् ।
तीर्थमेकं श्रयेन्मन्त्रमन्यतीर्थानि वर्जयेत् ॥'

पं० ९ क० पु० ज्ञानसत्त्वकालेति पाठः ।

पं० १९ क० पु० मूलादर्शपुस्तके 'कन्यकायतनं' इत्येवंविधः पाठोऽसंगतार्थः संदृश्यते ।

इति । तथा

'स्वस्थचेष्टाश्च ये मर्त्याः स्मरन्ति मम नारद ।
काष्ठपाषाणतुल्यांस्तानन्तकाले स्माराम्यहम् ॥'

इत्युक्तं । न च संस्थितस्य उत्तमतया अधिकारिणो लोकयात्राप्रसिद्धास्रुविमोचनादिपरिदेवितं कार्यम्, यथोक्तं श्रीपूर्वशासने

'निषिद्धं सर्वशास्त्राणां रोदनं कायशासनम् ।
विशेषाद्भैरवे तन्त्रे शम्बरं पशुकल्पितम् ॥
अयुक्तमिममाचारं त्यजेद्वै नौर्ध्वदैहिकम् ।'

इति । श्रीमतरहस्यतिलकेऽपि उत्तमनयाधिकारिणां संवृतनिजसदाचाराणां लोकप्रसिद्धिरक्षायै तदाचारापरित्यागोऽपि आम्नातः, तथाहि

'लोकाचारस्य विच्छेदो न कर्तव्यः कदाचन ।
गुह्यं गुह्यतरं कार्यं बाह्यं बाह्यान्तरं तथा ॥'

इति । अनयोश्च पक्षयोरेकतरपक्षावलम्बने प्रवरगुरव एव प्रमाणम् । पित्रुद्देशेन च यागजपहोमोपवासादि गुरुमाराध्य अवश्यं विधातव्यम् इत्युक्तम् श्रीमहाकुले

'आसूत्रिते भागलुसे यथेष्टरजसान्विते ।
अपि मन्त्रमनाहूय मण्डले विधिचोदिते ॥
संनिधानं प्रकुर्वन्ति मन्त्राणां सप्तकोटयः ।
किं पुनः कौलिकाम्नायस्तत्राहूय प्रपूजितः ॥
समुद्दिश्य पितॄन्भद्रे तदानन्त्याय कल्पते ॥'

इति । श्रीप्रचण्डभैरवेऽपि उक्तम्

'तनुवित्ताश्च ये मर्त्या गुरुमन्त्रपरायणाः ।
विशेषेण महायागपूजनं प्रति न क्षमाः ॥
सिद्धलिङ्गं तदा तेषां पित्रर्थं पूजयेद्बुधः ।
उचितं पूजनं तत्र देवानामपि दुर्लभम् ॥
कुलान्युद्धरते तत्र दश पूर्वापराण्यपि ।'

इति । श्रीभागेशमतेऽपि

'विषसर्पाग्न्यपस्मारक्षुधात्यशनबन्धनैः ।
चण्डालोदकनिर्घातराजशासनतस्करैः ॥
निदाघशीतशकटलूतोषितमहाव्रजैः ।
ब्राह्मणम्लेच्छपाषण्डिनिर्मूलोड्डामरक्रमैः ॥
ये हताः पापकर्माणो मित्रद्रोहरताश्च ये ।
स्वामिद्रोहकृताश्चान्ये ये तथात्मोपघातकाः ॥
गुर्विण्यो दुश्चरित्राश्च प्रसवेन हताश्च याः ।
तेषामुद्धरणोपायो नान्योऽस्ति वरवर्णिनि ॥
विना यागं विना होमं विना मूर्तिपरिग्रहम् ।
विना महाजालविधिप्रयोगाद्धतपुद्गलम् ॥
मृतोद्धरणसंज्ञां च दीक्षां सर्वाध्ववर्तिनीम् ।'

इति । तदयं तावत् ऊर्ध्वशासनवर्तिनां क्रमः । इतरेषां तु स्वशास्त्रसमयोपन्यस्तानुष्ठानमेव श्रेयः, तदलमनेन । एवं समनन्तरोदीरितया नीत्या जन्ममरणप्रबन्धसंबन्धम् अवधार्य, अकृत्रिमस्वरूपपरामर्शनेन जीवन्मुक्तिमासाद्य कृतकृत्यतामालम्बन्ते सन्तः । यथोक्तम्

'विदितमतिसतत्त्वाः संविदम्भोनिधाना-
दचलहृदयवीर्याकर्षनिष्पीडनोत्थम् ।
अमृतमिति निगीर्णे कालकूटेऽपि देवा
यदि पिबत तदानीं निश्चितं वः शिवत्वम् ॥'

इति ।

श्रीमद्योगेश्वराचार्यप्रसादासादितस्थितिः ।
वामदेवश्चकारेदं जन्ममृत्युविचारणम् ॥

अभिनवमदमन्थरा पुरन्ध्री
मधुसमये मधुराश्च गीतिबन्धाः ।
बत बत हृदयं हरन्ति वाचो
ललितपदाश्च रहस्यवस्तुगर्भाः ॥

समाप्तोऽयं जन्ममरणविचाराख्यो ग्रन्थः ॥

कृतिस्तत्रभवन्महामाहेश्वराचार्यवर्यश्रीमद्भट्टवामदेवस्य ॥

सद्विद्यानां संश्रये ग्रन्थविद्वद्-
व्यूहे ह्रासं कालवृत्त्योपयाते ।
तत्तत्सद्धर्मोद्दिधीर्षैकतान-
सत्प्रेक्षौजःशालिना कर्मवृत्त्यै ॥ १ ॥
श्रीमत्कश्मीराधिराजेन मुख्यै-
र्धर्मोद्युक्तैर्मन्त्रिभिः स्वैर्विवेच्य ।
प्रत्यष्ठापि ज्ञानविज्ञानगर्भ-
ग्रन्थोद्धृत्यै मुख्यकार्यालयो यः ॥ २ ॥
तत्राजीवं निर्विशद्भिर्मुकुन्द-
रामाध्यक्षत्वाश्रितैः सद्भिरेषः ।
पूर्त्या शुद्ध्या व्याख्यया संस्कृतः स्तात्-
पूर्णो ग्रन्थः श्रेयसे सज्जनानाम् ॥ ३ ॥

तिलकम् ॥

श्रीस्वात्मचिदमृतवपुःशंकरार्पणं भूयात् ॥

THE KASHMIR SERIES

OF

TEXTS AND STUDIES.

Kashmir Series of Texts and Studies.
No. XX.


THE AMARAUGHA SHĀSAN

OF

GŌRAKSHA-NĀTHA.

Edited with notes by
MAHĀMAHOPĀDHYĀYA
PAṆḌIT MUKUND RĀM SHĀSTRĪ,
Officer-in-Charge Research Department,
JAMMU AND KASHMIR STATE
SRINAGAR.

Published under the Authority of the Government of
His Highness Lieut.-General Mahārāja
Sir PRATĀP SINGH SĀHIB BAHĀDUR,
G. C. S. I., G. C. I. E., K. G. C. B. E., LL. D.,
MAHĀRĀJA OF JAMMU AND KASHMIR STATE.



BOMBAY:
PRINTED AT THE 'NIRNAYA-SAGAR' PRESS.
1918.

Printed by Ramchandra Yesu Shedge, at the 'Nirnaya-sagar' Press,
23, Kolbhat Lane, Bombay.

Published by Mahamahopadhyaya Pandit
Mukund Ram Shastri for the Research Department,
Jammu and Kashmir State, SRINAGAR.



काश्मीर-संस्कृतग्रन्थावलिः ।

ग्रन्थाङ्कः २०

अमरौघशासनम् ।

श्रीमन्महामाहेश्वराचार्यवर्य-श्रीसिद्धगोरक्षनाथविरचितम् ।

श्रीभारतधर्ममार्तण्ड-कश्मीरमहाराज-श्रीप्रतापसिंहवरप्रतिष्ठापिते
प्रज्ञविद्याप्रकाश-(रिसर्च)कार्यालये
तदध्यक्ष-महामहोपाध्याय-पण्डित-मुकुन्दराम-शास्त्रिणा
उद्दिष्टकार्यालयस्थेतरपण्डितसहायेन
संगृह्य, संशोधन-पर्यायाङ्कन-विवरणादिसंस्करणोत्तरं
पाश्चात्यविद्वत्परिषत्संमताधुनिकसुगमशुद्धरीत्युपन्यासादिसंस्कारैः परिष्कृत्य

मुम्बय्यां
निर्णयसागराख्यमुद्रणालये मुद्रापयित्वा प्राकाश्यमुपनीतः ।



संवत् १९७५ खैस्ताब्दः १९१८

काश्मीर-श्रीनगर ।

श्रीमच्छ्रीकण्ठनाथप्रभृतिगुरुवरादिष्टसन्नीतिमार्गो
लब्ध्वा यत्रैव सम्यक्पटिमनि घटनामीश्वराद्वैतवादः ।
कश्मीरेभ्यः प्रसृत्य प्रकटपरिमलो रञ्जयन्सर्वदेश्यान्-
देशेऽप्यस्मिन्नदृष्टो घुसृणविसरवत्तान्मुदे सज्जनानाम् ॥१॥

तरत तरसा संसाराब्धिं विधत्त परे पदे
पदमविचलं नित्यालोकप्रमोदसुनिर्भरे ।
विमृशत शिवादिष्टाद्वैतावबोधसुधारसं
प्रसभविलसत्सद्युक्त्यान्तःसमुत्प्लवदायिनम् ॥ २ ॥

अस्ति चानेनैव ग्रन्थेन सहकृत्य संबद्धं

अमरौघशासनम्

(ग्रन्थाङ्कः २०)

इत्यभिख्यो द्वितीयोऽपि ग्रन्थः 'श्रीमद्गोरक्षनाथसिद्धविरचितः' संबद्धः।

अस्य ग्रन्थस्य च विरचनकालः ग्रन्थकर्तुः 'अयं लोकप्रसिद्धो गोरक्षनाथः तदन्यो वा' इति प्रादुर्भावकाल-वसतिस्थानादिविषयकमितिवृत्तं निर्णेतुं न शक्यते।

इदं पुस्तकमपि मूलादर्शमात्रमेकमेव कुत्राप्यसंलक्ष्यमाणद्वितीयादर्शकं पूर्ववर्णितवृत्तान्तस्य आगराप्रदेशात्समधिगतप्राचीनशारदाक्षराङ्कितकाश्मीरिकपुस्तकसमुदायस्य मध्यवर्ति एकबन्धनबद्धान्यग्रन्थसहवर्त्युपर्यभिहितपुस्तकसहसंबद्धं सप्तचत्वारिंशशत्यारम्भिक—(४६०२ समीपवर्ति) लौकिकसंवत्सरानेहसि (यः ख्रैष्टः संवत्सरकालः १५२५ शात् उत्तरवर्ती षोडशशत्यपूर्वभागः समायाति) लिखितं समस्ति।

अस्ति चात्र विषयः—श्रीस्वच्छन्दतन्त्रादिमुख्यशैवागमेषु यथोपयोगं स्थाने स्थाने वितत्यानुशिष्टयोगपद्धत्यनुसृत्या सर्वासां नाडीनां मुख्यभूतस्य शरीर-वामदक्षिणाङ्गमध्यव्यापिनः सोमसूर्याग्निसमाश्रयभूतेडापिङ्गलासुषुम्नाख्यनाडीत्रयस्य मार्गे, शनैः शनैः प्राणवायोः संचारणाभ्यासात्, मूलाधारादुत्थाप्य नाभिहृत्कण्ठताल्वब्रह्मरन्ध्रान्तस्थानेषु क्रमेण ऊर्ध्वोर्ध्वयोजनया स्थित्यभ्यासबलात् वासनाक्षयमनोजयमनु परमोपादेयब्रह्मरन्ध्रद्वादशान्तवर्तिसो-

मामृतरसास्वादनेन सांसारिकनिःशेषक्लेशहानि-समस्तसिद्ध्यधिगमात्मभोगावाप्ति-परसौख्यमोक्षाप्तिफलानां, सारणा-परासारणा-प्रतिसारणा—शङ्खसारणा—महासारणादिपर्यायाणां नानाविधमुद्राणां सुगमपद्धत्यनुशासनम् । तदनु च शरीरोपादानपञ्चभूतानां, तन्मात्राणां, तद्गुणानां, तथा प्राणदशकस्य, इडादिनाडीसमुदायस्य, तद्दैवतसोमादीनां, त्वगादिदशधातूनां, तत्स्थितिपरिणामस्वरूपपरिमाणादीनां, मूलाधारादिस्थानानां, तद्वर्तिपद्मादीनां च संज्ञास्वरूपस्थितिगुणप्रभृतिसमनुबन्धिसमस्तज्ञेयज्ञानप्रक्रिया संक्षिप्य निर्णीतास्ति ।

तदेतद्ग्रन्थस्यापि समाधानेन मननिदिध्यासनपद्धत्यवलम्बनेन दुःखहानि-नित्यसुखात्मभोगमोक्षफलरसास्वादनोत्तरं सुफलयन्तु मामकीनं प्रकाशनान्तपरिश्रमं सज्जनवरसद्विद्वांसः ।

इत्याशासेऽहं प्रकाशकः

म० म० पं० मुकुन्दराम-शास्त्री=

श्रीमदमृतमूर्तये शंकराय नमः

अथ

अमरौघशासनम् ।

श्रीगोरक्षनाथसिद्धविरचितम् ।

ऊर्ध्वशक्तिनिपाताच्च तथाधःशक्तिकुञ्चनात् ।
मध्यशक्तिप्रबोधेन जायते परमं सुखम् ॥

ऊर्ध्वशक्तिनिपातः कन्दचतुष्टयेन ज्ञायते ।

यच्चन्द्रप्रभवं वराम्बरगतं यल्लिङ्गसंज्ञं जलं
स प्राणस्तदधः स्थिरं च कमलं धत्ते मुखोर्ध्वं हृदि ।
बध्वा कुम्भकमात्मगाढरचितं तद्ब्रह्मनाडीगतं
ध्यानेतु वदने षडध्वगकला सैवंविधा सारणा ॥

षडध्वगा कथ्यते

घण्टाकोटिकपोलकोटरकुटीजिह्वाग्रमध्याश्रया-
च्छाह्विन्यागतराजदन्तविवरं प्रान्तोर्ध्ववक्रेण यत् ।
संप्राप्तं हनुरन्ध्रमूलविधिना यच्चन्द्रतोयं मुखे
तत्सर्वं रविकालरूपसदने रक्षेत्परा सारणा ॥

कर्मान्तरेण परा सारणा कथ्यते

नृत्यन्नित्योर्ध्वजिह्वो यदि पिबति पुमान्वक्रधारामृतौघं
सुस्वादं शीतलाङ्गं दुरितभयहरं क्षुत्पिपासाविनाशि ।
पिण्डस्थैर्यं यदस्माद्भवति बत महामृत्युरोगा द्रवन्ते
दौर्भाग्यं याति नाशं हरति विषजरां याति काले भ्रमित्वा॥

सारणानन्तरं सारणा कथ्यते

जिह्वाग्रं त्वथ राजदन्तविवरं नीत्वा ततो घण्टिकां
संस्थाप्य प्रतिजिह्वपर्वं शशिनो मार्गे कलां च क्षिपेत् ।
एवंसारणिके पतन्ति च सुधाधाराः पुनः षण्मुख-
गान्धाराप्यथ तत्कलापमथनं नाडीमुखोज्जृम्भणम् ॥

सारणानन्तरं प्रतिसारणा कथ्यते

प्राणवातेन नीत्वोर्ध्वं कोटरे चन्द्रजां कलाम् ।
मन्थितां दिव्यजातां च तेन गान्धारकर्मणा ॥

गान्धारानन्तरं प्रतिसारणा कथ्यते

नासापश्चिममार्गवाहपवनात्प्राणेऽतिदीर्घीकृते
चन्द्राम्बु प्रतिसारणां सुकृतिनः प्राग्घण्टिकायाः पथः ।
सिञ्चन्कालविशालवह्निवशगं भूत्वा स नाडीशतं
तत्कार्यं कुरुते पुनर्नवतनुं जीर्णद्रुमस्कन्धवत् ॥

प्रतिसारणानन्तरं शङ्खसारणा कथ्यते

प्रोत्क्षिप्तं वृषणस्य गोलकयुगं मध्ये ध्वजं प्रोद्धृजं
नित्योर्ध्वं बत शङ्खसारणविधौ वक्रं विधेयं निजम् ।

सर्वस्थानशरीरबन्धनवशात्स्कन्धोद्धृतानां यथा
नाडीनां मुखतः सुधानिधिजलं सिञ्चन्नधो गच्छति ॥

कर्मान्तरेण शङ्खसारणा कथ्यते

वृषणाकर्षणं कार्यमथवा शङ्खसारणा ।
बोधनं चैव कुण्डल्यास्तिष्ठेच्चैवोत्कटासनम् ॥

शङ्खसारणानन्तरं महासारणा कथ्यते

पश्चादासनशुद्धवातनिकरानादाय कण्ठव्रणात्
संस्थाप्या रविमण्डले तु भुजगी संभूतनाडीत्रयात् ।
देवी मध्यपथोदिता प्रकुरुते कम्पं ततो मूर्च्छनां
दूराकर्पणदर्शनं श्रुतिगणांश्चान्या महासारणा ॥

कर्मान्तरेण महासारणा कथ्यते

आधाराम्बुजकोशकन्दभुजगी संभूय नाडीत्रयात्
चन्द्रार्कोद्भवनाडिकोर्ध्वयुगलं चाद्वैतपथ्यागतम् ।
तत्रैवाङ्गुलिभिर्निपीड्य क्रमशः शान्ति मनो मारुतं
चन्द्रो याति रविं ततश्च भुवने तुल्या महासारणा ॥
सूर्यान्तः शशिवीचिदन्तवदन[ने]प्रान्तप्लवौघोरगी
संप्रासे पवनातिसङ्गहरणे क्षिप्रं ततो धाविता ।
श्रीमन्मध्यपथान्ततो विदधती कम्पादि कोपान्विता
तस्यैवाश्रययायिनोऽपि शशिनो दत्ता सुधा संमता ॥
आदौ शोपणिकोऽत्र सारणमतः कार्यं महासारणं
कर्तव्यं प्रतिसारणं च गुरुणा निर्दिष्टमार्गे क्रमात् ।
पश्चादेव च शङ्खसारणविधौ कार्यं महासारणं
संमूर्च्छा वितताकृतिः प्रतिदिनं वेलात्रयं दीयताम् ॥

आकुंश्च्यागजकामरूपमचलं बन्धत्वजातं तनौ
नात्यूर्ध्वे चतुरङ्गुलाग्रविदिते स्थाने हृदा प्राणिते ।
दन्तैर्बन्धुरिते च वातयुगले प्रश्लेषणाश्लेषणात्
नाभिग्रन्थिविमोक्षपातसहजे मार्गे मनःसिद्धयः ॥

दूराकारविसर्पिते च पवने नाभेश्च मार्गस्थिते
बन्धेषु त्रिषु सत्सु सोऽपि शिथिले मध्यप्रबोधे सति ।
क्षिप्रं च ध्रियते द्विपीठमरुतोऽप्यूर्ध्वक्रमाकर्षणे
संयुक्तो गतिचित्तशोषणमतः प्राप्येऽनिले तिष्ठति ॥

मूले मूलोर्ध्वचक्रे वृषणकुलतले वह्निमातङ्गकूले
कम्पक्षोभभ्रमाढ्ये ध्वनितपरिचयं घर्मपातोर्ध्वरोम ।
भूमित्यागं कवित्वं परपुरविशनं वश्यमाकर्षणं च
ह्येवं वा चेतनाप्ता प्रभवति निखिला खेचरत्वप्रतिष्ठा ॥

द्वे ब्रह्मणी वेदितव्ये शब्दब्रह्म परं च तत् ।
हृदये परमे धाम्नि मध्ये तु रविचन्द्रमाः ॥

नादं तु तं गृहीत्वा च चैतन्यं तत्र योजयेत् ।
द्वे ब्रह्मणी वेदितव्ये शब्दब्रह्म परं च तत् ॥

शब्दब्रह्मणि निष्णातः परं ब्रह्माधिगच्छति ।
अन्यत्सर्वं परित्यज्य शब्दब्रह्म सदाभ्यसेत् ॥

स्वसंवेद्यमसंवेद्यं शब्दब्रह्म द्विधा स्थितम् ।
चिनोति प्रथमः शब्दश्चिञ्चिनोति द्वितीयकः ॥

विचरश्च तृतीयः स्याच्छङ्खशब्दश्चतुर्थकः ।
पञ्चमो मेघनिर्घोषः षष्ठमेतदुदीरणम् ॥

सप्तमं कांस्यतालाख्यं मेघशब्दस्तथाष्टमम् ।
नवमोऽप्यग्निदाहश्च दशमो दुन्दुभिस्वनः ॥
अनाहतनिनादोऽयं पवनान्तविनिर्गतः ।
ध्वनितेन विना यस्तु नादश्चैवमपण्डितः ॥
चिनोति रसमुद्धृत्य चिञ्चिनोति भगाश्रितम् ।
विरसांशेन संप्राप्तं मेघशब्देन चाविशेत् ॥
मज्जां पतति निर्घोषः संस्थितोदधिभीषणः ।
कांस्यताले नभःशब्दः प्राणमेघध्वनिः क्रमात् ॥
जीवश्चैवाग्निदाहः स्यान्मोक्षः समरसो भवेत् ।
विशुद्धमित्थमात्मानं पश्येत चात्मनात्मनि ॥
प्रथमे जनवात्सल्यं द्वितीये रोगनाशनम् ।
तृतीयेन कवित्वं च दूराकर्षं चतुर्थके ॥
पञ्चमे वाचि कामित्वं षष्ठे भूमिं परित्यजेत् ।
सप्तमे दूरमालोक्य चाष्टमे वज्रवद्भवेत् ॥
नवमे स्फुरते कायो दशमे सामरस्यकम् ।
पृथ्वीमध्ये भवेत्पृथ्वी चापामापस्तथैव च ॥
तेजोमध्ये भवेत्तेजो वायुर्वायौ प्रलीयते ।
आकाशे लीयते सर्वः सतत्त्वः पिण्डसंग्रहः ॥
अनाहतो दिवारात्रौ ध्वनते तु धनञ्जयः ।
तत्रारूढो यदा योगी प्राप्नुयात्परमं पदम् ॥

अयं प्रकृतिभेदः, पृथ्वी आपः तेजः वायुः आकाशश्च—इति शरीरे पञ्च गुणाः महाभूतानि

भवन्ति, तत्रैव तानि पञ्चविधानि भवन्ति। अस्थि मांसं त्वक् नाडी रोमाणि इति पञ्च-गुणा पृथिवी। लालामूत्रासृनिःस्वेदप्रस्वेदाः—इति पञ्चगुणा आपः। क्षुधा तृष्णा निद्रा आलस्यं कान्तिश्च—इति पञ्चगुणं तेजः। धावनं वल्गनम् आकुञ्चनं प्रसारणं निरोधश्च—इति पञ्चगुणो वायुः। रागो द्वेषो लज्जा भयं मोहश्च—इति पञ्चगुण आकाशः—इति पञ्चगुणालङ्कृतानि पञ्चतत्त्वानि। शब्दः स्पर्शः रसः रूपं गन्धश्च—इति पञ्च भूतगुणाः। शृङ्गारादिनवनाट्यरसाः इति हास्यादिभावाः शृङ्गारादीनाम्। कटुक-तिक्त-कषायाम्लमधुर-लवणाश्च—इति षट् आस्वादाः। शुभमशुभं च—इति कर्मद्वयम्। प्राणापान-समानो-दान-व्याना, नाग-कूर्म-कृकर-देवदत्त-धनञ्ज-याश्च—इति दश वाताः। इडा-पिङ्गला-सुषुम्ना-गान्धारी-हस्तिजिह्वा-यशस्विनी-पूषालम्बुसा-कुहू-शङ्खिनीप्रभृतयः द्वासप्ततिर्नाडीसहस्राणि। उत्पत्ति-स्थिति-प्रलयाश्च—इति मार्गत्रयम्। अ-

स्थिसंचयं पञ्चाधिकं शतत्रयम् अस्यस्य प्राणेन संबन्धः । काम-क्रोध-लोभ-मोह-मद-मानाहङ्काराश्च—इति सप्त बन्धनानि । विवेक-बोधसन्तोष-हर्ष-पुलक-क्षमोपशम-ध्यान-ज्ञानोत्सव-राग-वैराग्यानन्द-कम्प-मूर्च्छा-विकार-मनोवासनादीनि प्रकृतिस्वरूपाणि। रोम्णां कोटित्रयं सार्धं। वात-पित्त-श्लेष्माण – इति प्रकृतित्रयम्। वातः प्राणप्रकृतिः, पित्तं हुताशनोद्भूतं, श्लेष्मा निरोधात् भवति। त्वक् अस्टक् मांसं मेदः अस्थि मज्जा शुक्रं प्राणो जीवः शक्तिः – इति दश धातवः। घ्राणरन्ध्रद्वयं लोचनरन्ध्रद्वयं कर्णरन्ध्रद्वयं मुखरन्ध्रद्वयम् उत्सर्गरन्ध्रद्वयम्—इति दश द्वाराणि। अथ दशमद्वारं द्विविधं शुक्रमार्गममृतं, कालमार्गश्च – इति ब्रह्मदण्डमूले रविशशिमध्ये भगाकारमस्ति, तस्मादागतब्रह्मदण्डाश्रितं पश्चिमलिङ्गमस्ति, पश्चिमशब्देन स्थानमस्ति, तस्य मध्ये लिङ्गाकारमस्ति । अत्र पुरुषाणां रेतोमार्गः स्त्रीणां रजोमार्गः, सहैव तेन ब्रह्मदण्डरेखाश्रितपुष्पसमये सर्व-

व्यापकनाडीसमूहागतं कामिनीरजः स्रवति । तत्रैव कामविषहरनिरञ्जनानां संयोगं बीजपातात् आनन्दागमः प्रलयकाल-विषकालयोः कर्ता निरञ्जनश्च इति ।

शक्तित्रयविनिर्भिन्ने चित्ते बीजनिरञ्जनात् ।
वज्रपूजापदानन्दं यः करोति स मन्मथः ॥
चित्ते तृप्ते मनोमुक्तिरूर्ध्वमार्गाश्रितेऽनले ।
उदानचलितं रेतो मृत्युरेखाविषं विदुः ॥
चित्तमध्ये भवेद्यस्तु वालाग्रशतधाश्रये ।
नानाभावविनिर्मुक्तः स च प्रोक्तो निरञ्जनः ॥
निरञ्जनाश्रिता शक्तिः सूक्ष्मशक्त्या तयाश्रितम् ।
मनस्याश्रयतामेति ज्ञेयं शक्तित्रयं तु तत् ॥
शक्तित्रयोद्भवं बीजं बीजात्कामो विषं ततः ।
कामः सृष्टितया प्रोक्तो विषं मृत्युपदं भवेत् ॥

किं बहुना, काम-विषहर-निरञ्जनानां ब्रह्मदण्डमूलाङ्कुरे निवासः एभिर्यदमुखो [एभिर्यदा मुक्तिः स] मोक्षः भस्मीभूतस्य देहस्य पुनरागमनकार्यं नास्ति । अहो मूर्खता लोकस्य, केचिद्वदन्ति—शुभाशुभकर्मविच्छेदनं मोक्षः । केचिद्वदन्ति—वेदपाठाश्रितो मोक्षः । केचिद्वदन्ति—निरालम्बनलक्षणो मोक्षः । के-

चिद्वदन्ति – ध्यानकलाकरणसंबद्धप्रयोगसंभवेन रूपबिन्दुनादचैतन्यपिण्डाकाशलक्षणो मोक्षः । केचिद्वदन्ति – पूजापूजकमद्यमांसादिसुरतप्रसङ्गसानन्दलक्षणो मोक्षः । केचिद्वदन्ति – मूलकन्दोल्लासितकुण्डलिनीसंचारलक्षणो मोक्षः । केचिद्वदन्ति – सुसमदृष्टिनिपातलक्षणो मोक्षः, इत्येवंविधभावनाश्रितलक्षणो मोक्षो न भवति । अथ मोक्षपदं कथ्यते – यत्र सहजसमाधिक्रमेण मनसा मनः समालोक्यते स एव मोक्षः । कामविषहरस्थानं मानसोद्भवः मनोमध्ये कारणं कारणात् उत्पत्तिस्थितिप्रलयाः प्रवर्तन्ते । उक्तं च भगवता महेश्वरेण ।

'जीवन्मुक्तिपदे देवि चित्तं बीजनिरञ्जनम् ।
मृत्युमार्गस्थितो योगी ज्ञात्वा कर्म समभ्यसेत् ॥'

उम्मजन्त मरण हकारण मरणहजं मह ।
अव सुजीवनमरण इसरण गतकन्दुनाबिहत हतासु॥

इति जीवन्मुक्तिपदम्, अनेन मार्गेण स्थिरत्वं भवति । अथाधारणकर्मोदितशङ्खिनीभेदव्यवस्थाव्याख्या – गुदमेढ्रान्तरे त्रिकोणत्रिधा-

वर्तभगमण्डलमुच्यते, तत्र आधारग्रन्थय एकद्वित्रयश्च इति, एकद्वित्रयाणां मध्ये ग्रन्थीनामुपान्तरे चतुष्पत्रं पद्मम् अधोमुखं तिष्ठति, तत्र कर्णिकामध्ये मृणालसूत्रपरिमाणा शङ्खावर्ता तत्र प्रवालाङ्कुरसन्निभा द्वित्रिनाडीभूता कुण्डलिनी शक्तिः चैतन्यबीजमुखं गत्वा सुप्ता ।

तत्र त्रिपथमध्ये तु सूक्ष्मीभूता व्यवस्थिता ।
ऊर्णातन्तुनिभाकारा गता सा नाभिमण्डलम् ॥
चतुरङ्गुलमानेनाप्यष्टधा कुटिलाकृतिः ।
स्फुरिता नाभिमध्ये तु शाखाशाखमनेकधा ॥
दशनाड्याश्रितं चक्रं नाभिमध्ये प्रकीर्तितम् ।
इडा च पिङ्गला चैव सुषुम्ना च तृतीयका ॥
ऊर्ध्वमार्गस्थिता ह्येता वृहच्छाखावलम्बिताः ।
जयन्त्यलम्बुसा चैका बृहच्छाखावलम्बिनी ॥
प्रणीता सा ह्यनेकैस्तु ब्रह्मावर्तेन संस्थिता ।

ब्रह्मदण्डचक्रेणासौ कपालकर्परं यावत्, तस्मिन् कपालकर्परे चन्द्रमण्डलान्तर्गतं कपाललिङ्गं लम्पिकास्थानोर्ध्वेऽमृतधारामभिस्रवति, मस्तकमध्ये गर्भे तिष्ठति तदेवामृतं राजदन्तमये शङ्खिनी ब्रह्मदण्डतले दमयित्वा

स्रवति। एकं मुखरन्ध्रं राजदन्तान्तरे, एतदेव शङ्खिनीमुखं 'दशमद्वारम्' इत्युच्यते। यत्र च मूलभगमण्डलान्ते कुण्डलिनी शक्तिर्विनिर्गता तत्र वामभागोद्भवसोमनाडिका, दक्षिणभागोद्भवसूर्यनाडिका, चन्द्रो वामाङ्गव्यापकः, सूर्यो दक्षिणाङ्गव्यापकः, चन्द्रो वामाङ्गे वामनासापुटं, सूर्यो दक्षिणाङ्गे दक्षिणनासापुटम्—इत्येवं सूर्यचन्द्रौ व्यवस्थितौ। यत्र मूलकन्दे पवनोदयः, मनस उदयः, तपनोदयः, जीवोदयः, शब्दोदयः, मातृकाक्षरोदयश्च—इति। मनोमध्ये निद्राविषयम् इच्छाकार्यो निरञ्जनः परमात्मा।

मूलकन्दोद्यतो वायुः सोमसूर्यपथोद्भवः।
शक्त्याधारस्थितो याति ब्रह्मदण्डकभेदकः॥
मूलकन्दे तु या शक्तिः कुण्डलाकाररूपिणी।
उद्गमावर्तवातोऽयं प्राण इत्युच्यते बुधैः॥
कन्ददण्डेन चोद्दण्डैर्भ्रामिता या भुजङ्गिनी।
मूर्च्छिता सा शिवं वेत्ति प्राणैरेवं व्यवस्थिता॥

जन्मावस्थानादधो लिङ्गः स चाधारकन्दजातिमध्यस्थितो गुह्य ऊर्ध्वे भवति, तस्योर्ध्वे

लिङ्गस्थानं स्वाधिष्ठानं नाभिमण्डले मणिपूरकस्योर्ध्वभागेऽनलकः तेनोद्दण्डकार्यं समागच्छति, अधःप्रदेशे मणिपूरकस्य दक्षिणपश्चिमवर्त्ति अमेध्यस्थानम्, मध्ये नाभेःकन्दः, तत्र पद्माकृतिः, तत्र शरीरनाडीनामाधारः कथ्यते, हृदये पृथिवीतत्त्वं पीतवर्णं, मध्ये कदम्बगोलकाकृति, तत्र चित्तविश्रान्तिस्थानं तदेव अनलचक्रम्, कण्ठे चोदकप्रवाहपूर्णमात्मतत्त्वं तत् विशुद्धिस्थानम्, तालुमध्ये दीपशिखाकारः सदोद्द्योतः तत्तेजस्तत्त्वम्, कपालकन्दराङ्कुरे वायुतत्त्वम्, नासाग्रे आकाशतत्त्वम्, तस्योर्ध्वे आज्ञास्थानम्, आज्ञास्थानान्तरे ग्रन्थिषोडशान्तरे अमृता षोडशी कला, तदन्तरे वालाग्रशतधाश्रया अन्ते तस्योर्ध्वे कलान्ते बिन्दुः, बिन्दुभेदादनन्तरं शृंगाटकाकृतिर्मस्तकस्योद्देशः, तस्मिन् चित्तलयस्थानम्, चित्तस्य शरीरबन्धनाद्वयोपेतस्त्रैलोक्यविहारः, तस्याश्रिता ज्ञानशक्तिः, एवं शक्तित्रयालंकृतश्चिद्दर्पणप्रतिबिम्बः समो विविधभावकलाक-

लितः संसारचेष्टावलोकनकुशलः सुप्तावस्थायां रूपी जलचन्द्रवत् दृश्यते यः स परमात्मा सर्वव्यापी महेश्वरः चतुर्दशविधभूतग्रामकर्ता च इति, सोऽयं परमात्मा ॥

इति श्रीगोरक्षनाथविरचितं परमरहस्योपदेशमहाज्ञान-
ममरौघशासनं संपूर्णम् ॥

सद्विद्यानां संक्षये ग्रन्थविद्व-
व्यूहे ह्रासं कालवृत्त्योपयाते ।
तत्तत्सद्धर्मोद्दिधीर्षैकतान-
सत्प्रेक्षौजःशालिना कर्मवृत्त्यै ॥ १ ॥

श्रीमत्कश्मीराधिराजेन मुख्यै-
र्धर्मोद्युक्तैर्मन्त्रिभिः स्वैर्विवेच्य ।
अत्यष्टापि ज्ञानविज्ञानगर्भ-
ग्रन्थोद्धृत्यै मुख्यकार्यालयो यः ॥ २ ॥

तत्राजीवं निर्विशद्भिर्मुकुन्द-
रामाख्यस्त्वाश्रितैः सद्भिरेषः ।
पूर्त्यां शुद्ध्या व्याख्यया संस्कृतः स्यात्
पूर्णो ग्रन्थः श्रेयसे सज्जनानाम् ॥ ३ ॥

(तिलकम्)

श्रीमदमरेश्वरशिवार्पणं भूयात् ।

THE KASHMIR SERIES

OF


TEXTS AND STUDIES.

Kashmir Series of Texts and Studies.
No. XXIV.

THE
TANTRAVAṬA-DHĀNIKA.

Edited with notes by
MAHĀMAHOPĀDHYĀYA
PAṆḌIT MUKUND RĀM SHĀSTRĪ,
Officer-in-Charge Research Department,
JAMMU AND KASHMIR STATE,
SRINAGAR.

Published under the Authority of the Government of
His Highness Lieut.-General Mahārāja
Sir PRATĀP SINGH SĀHIB BAHĀDUR,
G. C. S. I., G. C. I. E., K. G. C. B. E., LL. D.,
MAHĀRĀJA OF JAMMU AND KASHMIR STATE.



BOMBAY:
PRINTED AT THE 'NIRNAYA-SAGAR' PRESS.
1918.

Printed by Ramchandra Yesu Shedge, at the 'Nirnaya-sagar' Press,
23, Kolbhat Lane, Bombay.

**Published by Mahamahopadhyaya Pandit
Mukund Ram Shastri for the Research Department,
Jammu and Kashmir State, SRINAGAR.**



काश्मीर-संस्कृतग्रन्थावलिः ।

ग्रन्थाङ्कः २४

तन्त्रवटधानिका ।



श्रीमन्महामाहेश्वराचार्यवर्य-श्रीमदभिनवगुप्ताख्याचार्य-
विशेषविरचिता ।

श्रीभारतधर्ममार्तण्ड-कश्मीरमहाराज-श्रीप्रतापसिंहवरप्रतिष्ठापिते
प्रत्नविद्याप्रकाश-(रिसर्च)कार्यालये
तदध्यक्ष-महामहोपाध्याय-पण्डित-मुकुन्दराम-शास्त्रिणा
उद्दिष्टकार्यालयस्थेतरपण्डितसहायेन
संगृह्य, संशोधन-पर्यायाङ्कन-विवरणादिसंस्करणोत्तरं
पाश्चात्यविद्वत्परिषत्संमताधुनिकसुगमशुद्धरीत्युपन्यासादिसंस्कारैः परिष्कृत्य

मुम्बय्यां
निर्णयसागराख्यमुद्रणालये मुद्रापयित्वा प्राकाश्यमुपनीतः ।



संवत् १९७५ ख्रैस्ताब्दः १९१८

काश्मीर-श्रीनगर।

श्रीमच्छ्रीकण्ठनाथप्रभृतिगुरुवरादिष्टसन्नीतिमार्गो
लब्ध्वा यत्रैव सम्यक्पटिमनि घटनामीश्वराद्वैतवादः ।
कश्मीरेभ्यः प्रसृत्य प्रकटपरिमलो रञ्जयन्सर्वदेश्यान्-
देशेऽप्यासिन्नदृष्टो घुसृणविसरवत्सतान्मुदे सज्जनानाम् ॥१॥

तरत तरसा संसाराब्धिं विधत्त परे पदे
पदमविचलं नित्यालोकप्रमोदसुनिर्भरे ।
विमृशत शिवादिष्टाद्वैतावबोधसुधारसं
प्रसभविलसत्सद्युक्त्यान्तःसमुत्प्लवदायिनम् ॥ २ ॥

श्रीसंविद्वपुषे शंकराय नमः

अथ

तन्त्रवटधानिका ।

श्रीमदभिनवगुप्ताख्याचार्यविशेषविरचिता ।

प्रथममाह्निकम् ।

प्रणम्य गुरुमीशानं सत्तन्त्रवटधानिका ।
मयाभिनवगुप्तेन स्वशक्त्युद्दीप्तये कृता ॥ १ ॥
अज्ञानं बन्धने हेतुर्बन्धनं हि पुनर्भवः ।
पुनर्भवश्च देहादौ वेद्ये स्वात्मत्वनिश्चयात् ॥ २ ॥
अहं सुकृतकारीति स्वर्गादौ भोक्तृता मम ।
इत्यादिदेहतादात्म्यात्स्वर्गावीच्यादिपूद्भवः ॥ ३ ॥
अतोऽनात्मनि देहादौ गलिते स्वात्मनिश्चये ।
घटादिवदनात्मेति देहादिं स्थितमप्यमुम् ॥ ४ ॥
पश्यतः पूर्वसंस्कारक्षयाद्देहे क्षयं गते ।
अन्योचितस्वसंस्काराभावाद्देहः कथं भवेत् ॥ ५ ॥
देहाभावेऽपि वै तस्य प्राणधीशून्यगोचरे ।
आत्मसंस्कारसद्भावे भवेत्तद्रूपता परम् ॥ ६ ॥
प्राणादावपि तु ध्वस्ते स्वात्मभावे परिस्फुटम् ।
सर्वावच्छेदहीनं तदात्मतत्त्वं प्रकाशते ॥ ७ ॥

पं० २ ख० पु० सूक्ष्माभिनवेति पाठः ।

अनवच्छिन्नरूपत्वादसंवेद्यं तदुच्यते ।
अवच्छेदाज्जडं वेद्यमन्याधीनप्रकाशकम् ॥ ८ ॥
स्वप्रकाशैकरूपत्वाद्भावात्मत्वेन भासनात् ।
तथात्वेऽपि स्वतन्त्रत्वाच्छक्तिमान्स शिवः स्मृतः॥९॥
सर्वात्मभूतः सर्वाध्वसमुत्तीर्णः स्वतन्त्रकः ।
स्वशक्त्या भासितानन्तविश्वः स परमेश्वरः ॥ १० ॥
स एष सत्यतो मुक्तः सर्वावच्छेदवर्जनात् ।
अन्ये न तत्त्वतो मुक्ता अवच्छेदांशसंभवात् ॥११॥
अतो यावन्न सर्वस्मिन्वेद्ये वेद्यतया गतिः ।
तावद्वेद्यांश एकस्मिन्भवेत्स्वात्मत्वनिश्चयः ॥ १२ ॥
यदा तु धरणीतत्त्वाच्छिवान्तं तत्त्वपञ्जरम् ।
अवच्छिन्नं भवेद्वेद्यमनन्योन्यात्मकं स्फुरत् ॥ १३ ॥
तदा तावति संवेद्यजाते वेदकमस्य यत् ।
इयतस्तदवच्छेदहीनं भाति परं शिवम् ॥ १४ ॥
तत्प्रकाशं प्रमातृत्वान्नेतरन्मेयभावतः ।
मेयत्वमस्यावच्छेदात्स ह्यवच्छेदके सति ॥ १५ ॥
तदेवं च धरातत्त्वाच्छिवान्तं मातृ नेतरत् ।
अमातृभावादेवान्यदप्रकाशात्मकं स्थितम् ॥ १६ ॥
अप्रकाशं च नास्त्येव सत्ता प्राकाश्यमेव हि ।
ततश्चायं प्रकाशत्वात्स्वयं सत्तास्य नोचिता ॥ १७॥
पराधीनैव सत्तास्य पराधीनप्रकाशनः ।
परिच्छेदप्रकाशस्तत्सोऽपि तत्तुल्य एव यत् ॥ १८॥
अतः प्रकाशाधीना चेत्सत्तास्मिन्सार्वकालिकी ।
नूनं प्रकाश एवास्ति योऽवच्छेदविवर्जितः ॥ १९ ॥

तत्र प्रकाशे भान्त्येते स्वावच्छेदनियन्त्रिताः ।
भावाः प्रकाशस्वातन्त्र्याद्विचित्राकारबृंहिताः ॥ २० ॥
यथा च तेऽवभासन्ते तथा तदुचिताः पुनः ।
तेषां प्रकाशका भान्ति सुरान्तास्तिर्यगादयः ॥ २१ ॥
प्रकाशकत्वाच्चैतेषां शिवात्मत्वेऽपि सुस्फुटे ।
वेद्याश्चान्योन्यतश्चायमवच्छेदोऽस्ति यत्नतः ॥ २२ ॥
अप्रकाशत्वमप्यस्ति तत्प्रकाशप्रकाश्यताम् ।
गतास्ते पशवो भान्ति शिवस्यैव स्वशक्तितः ॥ २३ ॥
अवच्छेदांश एतेषां स्वप्रकाशश्च यः स्फुटः ।
स विचित्रस्वभावत्वाद्देहप्राणादितां गतः ॥ २४ ॥
देहादेरपि वैचित्र्याद्देवतिर्यङ्मनुष्यता ।
वैचित्र्यान्तरतोऽत्रापि चैत्रमैत्रादिरूपता ॥ २५ ॥
यथा च पशवो भान्ति तथा केचन तां निजाम् ।
अप्रकाशदशां घ्नन्ति देहप्राणतदात्मताम् ॥ २६ ॥
ते प्रबुद्धाश्च पतयो जीवन्मुक्ता महर्षयः ।
तेषां तत्तारतम्येन गुरुशिष्यादिता स्थिता ॥ २७ ॥
तदेवं भेदभोक्तृत्वं सृष्टिस्तत्स्थिरता स्थितिः ।
अंशेन न्यक्क्रिया तस्य संहारोऽनुग्रहः पुनः ॥ २८ ॥
अप्रकाशदशाध्वंसस्तदुपायैकलग्नता ।
हृदयान्निन्दनं तस्य तत्सेवा तत्तिरोहितिः ॥ २९ ॥
एवंविधं पञ्चकृत्यं भासयन्परमेश्वरः ।
यदाभाति तदेवास्य चित्त्वमैश्वर्यमुच्यते ॥ ३० ॥
तथाविधप्रकाशांशध्वंसः कस्याप्युपायतः ।
विनैव कस्य चिच्चित्रैरुपायैः संस्क्रियादिभिः ॥ ३१ ॥

पं० ६ ख० पु० वेद्यादन्योन्यत इति पाठः ।

तदेवं वेद्यरूपत्वाद्वोद्धृत्वं बन्धमुक्तता ।
इयतः सकलस्यात्मा प्रकाशोऽभ्यधिकस्ततः ॥ ३२॥
सर्वातिरिक्तः सर्वात्मा स्वतन्त्रः सर्वशक्तिकः ।
सर्वपूर्णोऽनवच्छिन्नप्रकाशो भैरवः पुनः ॥ ३३ ॥
यद्रूपत्वं परा मुक्तिः पुनरावृत्तिवर्जिता ।
अन्यास्तु धीप्राणशून्यधियो जन्मक्षयोचिताः ॥३४
शून्यं धीः प्राण इत्येतत्सृज्यते क्षीयतेऽपि च ।
स्थैर्यमस्य परं देहापेक्षया न तु तत्त्वतः ॥ ३५ ॥
अतः षट्त्रिंशदन्तःस्थे तत्त्वे स्वात्मत्वनिश्चयात् ।
वेद्यांशे मुक्तिरस्य स्यादावृत्तिः सोर्ध्वतः परम् ॥३६
यदा समस्तवेद्यांशसमुत्तीर्णं परं महः ।
भाति मुक्तस्तदैवासौ भैरवः परमः स्मृतः ॥ ३७ ॥

इति श्रीमदभिनवगुप्ताचार्यविशेषविरचितायां तन्त्रवटधानिकायां
प्रथममाह्निकम् ॥ १ ॥

पं० १२ ख० पु भैरवः परमेश्वर इति पाठः ।

द्वितीयमाह्निकम् ।

[1]उपायैर्न शिवो भाति भान्ति ते तत्प्रसादतः ।
स एवाहं स्वप्रकाशो भासे विश्वस्वरूपकः ॥ १ ॥
इत्याकर्ण्य गुरोर्वाक्यं सकृत्केचन निश्चिताः ।
विना भूयोऽनुसंधानं भान्ति संविन्मयाः स्थिताः २
यथादर्शे घटादीनां स्थितिर्मिश्रेतरात्मिका ।
चिदात्मनि तथामीषां भावानां चित्ररूपिणी ॥ ३ ॥
आदर्शस्तु जडत्वान्न स्वतन्त्रो भासते यथा ।
अहंप्रकाशरूपत्वात्स्वतन्त्रो भासते तथा ॥ ४ ॥
इत्येवं गुरुतः श्रुत्वा वाक्यं तद्भावनाक्रमात् ।
भूयोभूयोऽनुसंधानात्कोऽपि याति शिवात्मताम् ॥५
नाहं देहात्मको नाहं कर्माधीनो न मे मलः ।
नान्येन प्रेरितोऽस्मीति किं त्वेतद्विपरीतकम् ॥ ६ ॥
इत्थं विकल्पं संस्कृत्य स्पष्टविद्यात्मतां नयन् ।
कश्चिद्याति समावेशं धन्यः श्रीगुरुवाक्यतः ॥ ७ ॥
स्वप्रकाशं समस्तात्मतत्त्वं मात्रादिकं त्रयम् ।
अन्तःकृत्य स्थितं ध्यायेद्धृदयानन्दधामनि ॥ ८ ॥
तद्द्वादशमहाशक्तिरश्मिचक्रेश्वरं विभुम् ।
व्योमभिर्निःसरद्धात्वे ध्यायेत्सृष्टिं स्थितो दधत्॥९॥

१ 'उपायैर्न शिवो भाति' इत्यादि पद्यद्वयं तन्त्रालोके (२ आ० २ पद्यटीकायां) यदुक्तमितीयता ग्रन्थकृत्तामानुद्दिश्य यत्प्रमाणरूपेणोपन्यस्तमतोऽनुमीयते एतद्ग्रन्थकृदभिनवगुप्तः प्रसिद्धाभिनवगुप्ताचार्याद्भिन्नो राजानकजयरथाचार्यात्पौर्वकालिकश्च संभवतीति ।

पं० १९ स० पु० स्थितिं ध्यायेदिति पाठः ।

पश्चाद्ग्रस्तसबाह्यान्तर्भावमज्ञानमात्मनि ।
विश्राम्येत्पुनरप्येवं ध्यानाभ्यासात्प्रथात्मनः ॥१०॥
प्राणो बोधमयः पूर्वं तत्र उल्लसति स्फुटम् ।
मेयं पूरयते तेन स क्रमैक्यं प्रपद्यते ॥ ११ ॥
तदेव संजिहीर्षेत संहृत्यापूर्णतां नयेत् ।
एतावदनुसंधत्ते सप्त विश्रान्तयस्त्विमाः ॥ १२ ॥
उन्मिषत्तोन्मिषितता संघजैरेकविंशतिः ।
आनन्द उद्भवः कम्पो निद्रा............... ॥ १३ ॥
तत्रोत्तरोत्तरावेशभेदात्पश्चोत्तरं च यत् ।
तत्रापि त्रितयं मुख्यं सृष्टिसंहारबीजकम् ॥ १४ ॥
योगिनीहृदयानन्दव्योमभूसंप्रदायतः ।
अव्यक्तेतरयुग्मात्मलिङ्गतादात्म्ययोगतः ॥ १५ ॥
श्रीमदाचार्यचक्रस्थो मन्त्रवीर्यं तदुत्तमम् ।
अष्टोत्तरशताविष्टं मन्त्राः प्राणपथे यतः ॥ १६ ॥
एवं धीप्राणसंघट्टद्वारेणान्तः समाविशन् ।
शाम्भवीं परमां धारामाणवेन प्रपद्यते ॥ १७ ॥
तदेवं त्रिविधं प्राप्य गुरोरावेशमुत्तमम् ।
गुरुमभ्यर्चयेद्धीमान्देहसर्वस्वदानतः ॥ १८ ॥
नैनं प्रकोपयेन्नास्य वाक्यं किंचन लङ्घयेत् ।
अविचारितमस्याज्ञां कुर्याज्ज्ञानं स्थिरं तथा ॥१९॥

इति श्रीमदभिनवगुप्ताचार्यविशेषविरचितायां तन्त्रवटधानिकायां
द्वितीयमाह्निकम् ॥ २ ॥

पं० १२ ख० पु० तादात्म्यनिश्चय इति पाठः ।

तृतीयमाह्निकम् ।



एवमाभ्यन्तरी सत्ता शिवतादात्म्यदायिनी ।
यथा भवेत्तथा प्रोक्तं बाह्येदानीं निगद्यते ॥ १ ॥
बाह्यो भेदो द्विधा दृष्टः क्रियातो रूपतस्तथा ।
एकस्मिन्नपि कालात्मा तत्राद्यो देशतः परम् ॥ २ ॥
क्रिया स्वात्मपरिस्पन्दस्ततः प्राणोऽथ तत्कृतम् ।
कालवैचित्र्यमित्येवं संवित्स्पन्दाधिकं नहि ॥ ३ ॥
यथा संविद्धटात्मासौ चिदात्मेति तरङ्गिता ।
शक्तिस्तथा विचित्रोऽयं सृष्टिसंहारविभ्रमः ॥ ४ ॥
स्वप्नसंकल्पमायांशक्रियावैचित्र्यचित्रितः ।
विचित्रः काल एकोऽयं संसारस्पन्द ईदृशः ॥ ५ ॥
प्राकृतं पार्थिवं वैश्वं शाक्तं चाण्डचतुष्टयम् ।
विचित्रदेशभुवनतत्त्वात्मकमिदं स्फुरत् ॥ ६ ॥
ममैवान्तरतः सर्वदेशकालात्मिकां भिदाम् ।
अन्तःकृत्याहमेवैक इति ज्ञानाद्विमुक्तता ॥ ७ ॥
यावद्विचित्रं बाह्यं हि तन्न षट्त्रिंशतः परम् ।
मानसं वेत्ति विश्रान्त्या विना संविन्मयं यतः ॥८॥
कठिनं द्रवमत्युष्णं स्पर्शं च सावकाशतः ।
पञ्च भूतानि चित्राणि तन्मात्राणि तु तद्गुणाः ॥९॥
गन्धो रसो रूपमथ स्पर्शः शब्दो विशेषकः ।
एतेषां ग्राहकं चाक्षं पञ्चधा ज्ञानशक्तिजम् ॥ १० ॥

क्रियाशक्त्युत्थमन्यच्च तत्कर्मेन्द्रियपञ्चकम् ।
संकल्पनिश्चयौ मानस्तदन्तःकरणत्रयम् ॥ ११ ॥
इयतो वेद्यजातस्य यदभिन्नं वपुः पुरा ।
तत्प्रधानमियद्वेद्यं जडं तद्वेदकः पुमान् ॥ १२ ॥
सोऽप्रकाशप्रकाशात्मा षट्कञ्चुकपरिष्कृतः ।
किंचित्करोति जानाति तच्चेदं शक्तिमानिह ॥ १३ ॥
यतोऽस्मि सोऽधुनैवैते कला विद्या सरक्तयः ।
कालश्च सर्वतत्त्वानां पूर्णभूमिर्निशा स्पृहा ॥ १४ ॥
अप्रकाशांशगलने प्रकाशस्य स्फुटा स्थितिः ।
प्रकाशदर्पणे भावदर्शनं तदभेदतः ॥ १५ ॥
भावानां भासनं शुद्धः प्रकाश इति पञ्चधा ।
विद्यातत्त्वादा शिवान्तं तदभिन्नः परः शिवः॥१६॥
उपदेश्यतया सोऽपि स्यादवच्छेदभागतः ।
अष्टात्रिंशं परं धाम यत्रेदं विश्वकं स्फुरत् ॥ १७ ॥
प्रत्येकमपि भावस्य यो भेदो ज्ञातृभेदतः ।
यथा घटं वेद्मि तथा मया ज्ञातं शिवेन वा ॥ १८ ॥
इत्येवं स्वात्मनः सर्वमन्तः पश्यन्स्वसंविदा ।
गलिताशेषभेदांशो भैरवीभावमश्नुते ॥ १९ ॥
इयद्यदुक्तं तत्कोऽपि स्वयमेवाववुध्यते ।
कश्चिद्गुरूपदेशेन शास्त्राद्वाथ द्वयात्त्रयात् ॥ २० ॥
गुरोस्त्वभ्यस्तविज्ञानो दीक्षया स विमुच्यते ।
दीक्षा च सामयी नाम मन्त्रतादात्म्यदायिनी ॥२१॥
चर्याक्रमेण देहान्ते सम्यक्समयपालनात् ।
सा च सर्वाध्वसंपूर्णमात्रसंविदभेदिता ॥ २२ ॥

पं० १५ ख० पु० मपि तत्त्वस्य य इति पाठः ।

गुरुणानुग्रहधिया शिष्ये यदवलोकनम् ।
पौत्रिकी सा पुनश्चर्यामात्रेण प्रायणे यया ॥ २३ ॥
परं शिवत्वमभ्येति विनापि ज्ञानयोगतः ।
सा च क्रमात्क्रमं शिष्यचितेः शिवनियोजनम् २४
अतिक्रम्य तु षट्त्रिंशदन्तमध्वानमादरात् ।
सास्वस्थे प्राप्तमृत्यौ वा मृते दूरस्थ एव वा ॥ २५ ॥
गुर्वन्तेवासितद्बन्धुमुखोत्थाच्छक्तिपाततः ।
स्थावरेष्वथ दीक्षा हि पशुष्वपि निरूपिता ॥ २६ ॥
ते तु न ज्ञानहीनत्वात्साधका गुरवोऽपि वा ।
समस्तज्ञानसंभारपूर्णस्वात्मविकासतः ॥ २७ ॥
वाञ्छन्साधकतां नेयो निष्कामस्तु गुरूत्तमः ।
सर्वसंपूर्णकृत्यस्य स्वात्मार्थेऽनभिलाषिणः ॥ २८ ॥
पारिशेष्यात्परार्थैव ह्यनपाया क्रियेशवत् ।
नित्यं नैमित्तिकं चैव गुरुः समयिपुत्रके ॥ २९ ॥
द्वयेऽप्युपदिशेदाद्यः स्वयं नित्यमुपाचरेत् ।
नैमित्तिकं गुरुः कुर्यात्तच्च पर्वदिनार्चनम् ॥ ३० ॥
यत्र सिद्धाश्च खेचर्यः संकेतं चक्रिरे पुरा ।
पवित्रकविधिश्चान्यो यः समग्रं प्रपूरयेत् ॥ ३१ ॥
नैमित्तिकं मुख्यकल्पं सर्वथा समुपाचरेत् ।
शक्तितद्वद्भेदेन स्वानन्दात्मकवस्तुनि ॥ ३२ ॥
तद्रसासारधातूत्था क्रिया मुख्यो विधिस्त्वयम् ।
मासि मास्यथ वर्षे वा जन्ममध्येऽथ वा पुनः ॥३३॥
मुख्येन विधिना वृत्तिस्तर्हि चर्या न पूरिता ।
अपूर्णचर्यायोगेन चर्यापायैकमुक्तिकः ॥ ३४ ॥

पं० १७ क० पु० सिद्धाश्च ये चार्या इति पाठः ।

मुक्तो विघ्नं व्रजेत्तस्मात्सर्वथा पूरयेद्विधिम् ।
कश्चिदीशेच्छया सम्यगनाश्वस्तोऽपि चेतसा ॥३५॥
निन्दन्नेव भजंश्चर्यां स तिरोहित उच्यते ।
निन्द्यमाने महामन्त्रविद्याचर्यादिकोपजम् ॥ ३६ ॥
पाप्मैषां पातयेद्धोरे यातनाधाम्नि सर्वथा ।
कस्यापि तु तिरोभूतवृत्तेरपि पुनर्निजम् ॥ ३७ ॥
हृदयं सम्यगाश्वासादविघ्नं शिवतां व्रजेत् ।
एवं धीप्राणसंबन्धादान्तराद्बाह्यतोऽपि च ॥ ३८ ॥
चर्यया यः समावेशः स इहाणव उच्यते ।
तस्मिन्रूढः समभ्येति शाक्तमस्माच्च शांभवम् ॥३९॥
ततः परं पूर्वसत्तां पररूढस्तु न त्यजेत् ।
उल्काहस्तो यथा कश्चित्प्राप्यमादाय तां त्यजेत् ४०
ज्ञानेन ज्ञेयमालोक्य तथा ज्ञानं त्यजेदिति ।
उक्तं श्रीकालपादादौ ज्ञाने नष्टे न तत्सदा ॥ ४१ ॥
ज्ञप्तिसाधनमेवोक्तं न ज्ञेयं परमं पदम् ॥ ४२ ॥
एषाभिनवगुप्तेन रचिता तन्त्रधानिका ।
हृद्भूमौ यस्य रूढा स शिवकल्पमहीरुहः ॥ ४३ ॥

इति श्रीमदभिनवगुप्ताचार्यविशेषविरचितायां तन्त्रवटधानिकायां तृतीयमाह्निकम् ॥ ३ ॥

समाप्ता चेयं तन्त्रवटधानिका ॥

पं० १६ क० पु० न ज्ञानं परमेति पाठः ।

सद्विद्यानां संश्रये ग्रन्थविद्वद्-
व्यूहे ह्रासं कालवृत्त्योपयाते ।
तत्तत्सद्धर्मोद्दिधीर्षैकतान-
सत्प्रेक्षौजःशालिना कर्मवृत्त्यै ॥ १ ॥

श्रीमत्कश्मीराधिराजेन मुख्यै-
र्धर्मोद्युक्तैर्मन्त्रिभिः स्वैर्विवेच्य ।
प्रत्यष्ठापि ज्ञानविज्ञानगर्भ-
ग्रन्थोद्धृत्यै मुख्यकार्यालयो यः ॥ २ ॥

तत्राजीवं निर्विशद्भिर्मुकुन्द-
रामाध्यक्षत्वाश्रितैः सद्भिरेषः ।
पूर्त्या शुद्ध्या व्याख्यया संस्कृतः स्तात्
पूर्णो ग्रन्थः श्रेयसे सज्जनानाम् ॥ ३ ॥

